त्वात्स्तेनाहृतमतिचार उक्तम्[1]। अतिचारता चास्य मात्रा चौर्यप्रवृत्तेः[2] ॥ १ ॥ तक्करप्पओगे[3] त्ति तस्करप्रयोगश्चौरव्यापारणं[4], "हरत यूयम्" इत्येवमभ्यनुज्ञानमित्यर्थः[5]। अस्याप्यतिचारतानाभोगादिभिरिति ॥ २॥ विरुद्धरज्जाइक्कमे त्ति विरुद्धनृपयो राज्यं विरुद्धराज्यं, तस्यातिक्रमो ऽतिलङ्घनं[6] विरुद्धराज्यातिक्रमः। न हि ताभ्यां तत्रातिक्रमो ऽनुज्ञातश्चौर्यबुद्धिरपि तस्य तत्र नास्तीत्यतिचारतास्यानाभोगादिना[7] चेति ॥ ३॥ कूडतुल्लकूडमाणे[8] त्ति तुला प्रतीता, मानं कुडवादि[9], कूटत्वं न्यूनाधिकत्वम्। ताभ्यां न्यूनाभ्यां ददतो ऽधिकाभ्यां गृह्णतो ऽतिचरति व्रतमित्यतिचारहेतुत्वादतिचारः कूटतुलाकूटमानमुक्तम्[10]। अतिचारत्वं चास्यानाभोगादेः, अथवा "नाहं चौरः चत्रखननादेरकरणाद्[11]" इत्यभिप्रायेण व्रतसापेक्षत्वात् ॥ ४ ॥ तप्पडिरूवगववहारे त्ति तेनाधिकृतेन[12] प्रतिरूपकं सदृशं तत्प्रतिरूपकं, तस्य विविधमवहरणं[13] व्यवहारः प्रक्षेपस्तत्प्रतिरूपकव्यवहारः। यद्यत्र घटते व्रीहिघृतादिषु पलञ्जीवसादि[14] तस्य प्रक्षेप इति यावत्, तत्प्रतिरूपकेन वा वसादिना[15] व्यवहरणं तत्प्रतिरूपकव्यवहारः। अतिचारता चास्य पूर्ववत् ॥ ५ ॥

॥ ४८ ॥ सदारसन्तोसीए[16] त्ति स्वदारसन्तुष्टेरित्यर्थः ॥ इत्तरियपरिग्गहियागमणे[17] त्ति इत्वरकालपरिगृहीता, कालशब्दलोपादि-

---

१ a om. अतिचार उक्तः c e उक्तः। २ a चौर्याप्रवृत्तेः। ३ a c e तक्करपयोग त्ति। ४ c e तस्करः प्र०। ५ a ०र्थो ऽस्या०, c र्थो सा०, e ०र्थ सा०। ६ c अभिलङ्घनं। ७ c e ०अतिचारता तस्या०। ८ a कूडतुलकूडमाणे, e कूडतुले कूडमाणे। ९ c कुंडवादि। १० a c e कूडतुलाकूडमानम्। ११ c e चात्र०। १२ e om. अधिकृतेन। १३ e विवधम्। १४ a c e ०वशादि। १५ c e वशादिना। १६ a c e ०सन्तोसिय त्ति। १७ a इत्तिरिय०।

त्वरपरिगृहीता, भाटीप्रदानेन कियन्तमपि कालं दिवसमासादिकं स्ववशीकृतेत्यर्थः, तस्यां गमनं मैथुनासेवनमित्वरपरिगृहीतागमनम्। अतिचारता चास्यातिक्रमादिभिः ॥ १ ॥ अपरिग्गहियागमणे त्ति अपरिगृहीता नाम वेश्यान्यसक्तापरिगृहीतभाटिका[1] कुलाङ्गना वा अनाथेति। अस्याप्यतिचारतातिक्रमादिभिरेव ॥ २ ॥ अणङ्गकीड[2] त्ति अनङ्गानि मैथुनकर्मापेक्षया कुचकुक्षोरुवदनादीनि, तेषु क्रीडनमनङ्गक्रीडा। अतिचारता चास्य स्वदारेभ्यो ऽन्यत्र मैथुनपरिहारेणानुरागादालिङ्गनादि विदधतो व्रतमालिन्यादिति ॥ ३ ॥ परविवाहकरणे[3] त्ति परेषामात्मन[4] आत्मीयापत्येभ्यश्च व्यतिरिक्तानां विवाहकरणं परविवाहकरणम्। अयमभिप्रायः। स्वदारसन्तोषिणो हि न युक्तः[5] परेषां विवाहादिकरणेन मैथुननियोगो ऽनर्थको विशिष्टविरतियुक्तत्वादित्येवमनाकलयतः परार्थकरणोद्यततयातिचारो ऽयमिति ॥ ४ ॥ कामभोगा[6] तिव्वाभिलासे त्ति कामौ शब्दरूपे[7], भोगा गन्धरसस्पर्शास्तेषु तीव्राभिलाषो ऽत्यन्तं तदध्यवसायित्वं कामभोगतीव्राभिलाषः। अयमभिप्रायः। स्वदारसन्तोषी हि विशिष्टविरतिमान्, तेन च तावत्येव[8] मैथुनासेवा[9] कर्तुमुचिता यावत्या वेदजनिता[10] बाधोपशाम्यति। यस्तु वाजिकरणादिभिः कामशास्त्रविहितप्रयोगैश्च तामधिकामुत्पाद्य सततं सुरतसुखमिच्छति, स मैथुनविरतिव्रतं परमार्थतो मलिनयति। को हि नाम सकर्णकः

१ वेश्या°; a °श्यान्यसक्ता°, e श्यान्यासक्ता°; i. e. वेश्यानि समक्ता अपरि° २ a c e अनङ्गकीड त्ति। ३ a c °वीवाह°। ४ a आतान, e आत्मान। ५ e युक्तं (scl. परविवाहकरणम्); a c युक्तः (scl. मैथुननियोगः)। ६ a c e कामभोगतिव्वभिलासे। ७ c e शब्दरूपौ। ८ c e तावत्यैव। ९ c e only मैथुन कर्तुं om. सा°वा। १० e वेदजनितबाधो ऽपशाम्यति।

पामामृत्पाद्याग्निसेवाजनितसुखं वाञ्छेदिति। अतिचारत्वं कामभोगतीव्राभिलाषस्येति ॥ ५ ॥

॥ ४९ ॥ खेत्तवत्थुपमाणाइक्कमे[1] त्ति क्षेत्रवस्तुनः प्रमाणातिक्रमः। प्रत्याख्यानकालगृहीतमानोल्लङ्घनमित्यर्थः। एतस्य चातिचारत्वमनाभोगादिनातिक्रमादिना वा। अथवा एकक्षेत्रादिपरिमानकर्तुस्तदन्यक्षेत्रस्य वृत्तिप्रभृतिसीमापनयनेन पूर्वक्षेत्रे[2] योजनात्क्षेत्रप्रमाणातिक्रमः। अतिचार एव व्रतसापेक्षत्वात्तस्येति[3] ॥ १ ॥ हिरण्णसुवण्णपमाणाइक्कमे त्ति प्राग्वत्। अथवा राजादेः सकाशाल्लब्धं[4] हिरण्याद्यभिग्रहावधिं[5] यावदन्यस्मै[6] प्रयच्छतः[7] "पुनरवधिपूर्त्तौ ग्रहीष्यामि" इत्यवसायवतो ऽयमतिचारस्तथैवेति ॥ २ ॥ धणधन्नपमाणाइक्कमे त्ति अनाभोगादेः। अथवा लभ्यमानं धनाद्यभिग्रहावधिं यावत्परगृह[8] एव बन्धनबद्धं कृत्वा धारयतो ऽतिचारो ऽयमिति ॥ ३ ॥ दुपयचउप्पयपमाणाइक्कमे त्ति अयमपि तथैव। अथवा गोवडवादिचतुष्पदयोषित्सु यथा अभिग्रहकालावधिपूर्त्तौ[9] प्रमाणाधिकवत्सादिचतुष्पदोत्पत्तिर्भवति, तथा खण्डादिकं प्रक्षिपतो ऽतिचारो ऽयम्। तेन हि। जातमेव वत्सादिकमपेक्ष्य[10] प्रमाणातिक्रमस्य परिहृतत्वाद्गर्भगतापेक्षया तस्य सम्पन्नत्वादिति ॥ ४ ॥ कुवियपमाणाइक्कमे त्ति कुप्यं गृहोपस्करः[11] थालकचोलकादि[12]। अयं चातिचारो ऽनाभोगा-

---

१ a e ॰प्पमना॰, c ॰परिमाणा॰। २ c e पूर्वक्षेत्रयोजनात्। ३ c अस्य for तस्य। ४ c e ॰लब्धहि॰। ५ a अवधि, c अवधेर्, e अवधिर्। ६ e अन्यस्मिन्। ७ c प्रयच्छति। ८ a c e ॰गेह। ९ c ॰कालावधेः। १० a c अपेक्ष। ११ e गृहोपस्करं। १२ a थालक॰; the words are modern; *thāla* (Skr. *sthāla*) is a large, and *kacholā* (or *kancholā*, Marāṭhī *kacholē*) is a small metal vessel.

दिना। अथवा पञ्चैव स्थालानि परिग्रहीतव्यानीत्याद्यभिग्रहवतः कस्याप्यधिकतराणां तेषां सम्पत्तौ प्रत्येकं द्यादिमेलनेन[1] पूर्वसङ्ख्यावस्थापनेनातिचारो ऽयमिति ॥ ५ ॥ आह च।

खेत्ताइहिरणाईधणाइदुपयाइकुप्पमाणकमे[2]।
जोयणपयाणबन्धणकारणभावेहि नो कुज्जा ॥

॥ ५० ॥ दिग्व्रतं शिक्षाव्रतानि च यद्यपि पूर्वं नोक्तानि, तथापि तत्र तानि द्रष्टव्यानि। अतिचारभणनस्यान्यथा निरवकाशता स्यादिहेति। कथमन्यथा प्रागुक्तं "दुवालसविहं सावगधम्मं पडिवज्जिस्सामि" इति, कथं वा वक्ष्यति "दुवालसविहं सावगधम्मं पडिवज्जइ" इति[3]। अथवा सामायिकादीनामित्वरकालीनत्वेन प्रतिनियतकालकरणीयत्वान्न तदैव तान्यसौ प्रतिपन्नवान्, दिग्व्रतं च विरतेरभावाद्, उचितावसरे तु प्रतिपत्स्यत[4] इति। भगवतस्तदतिचारवर्जनोपदेशनमुपपन्नं, यच्च वक्ष्यति "द्वादशविधं श्रावकधर्मं प्रतिपद्यते", तद्यथाकालं तत्करणाभ्युपगमनादनवद्यमवसेयमिति ॥ तत्र उड्ढदिसिपमाणाइक्कमे त्ति[5] क्वचिदेवं पाठः, क्वचित्तु उड्ढदिसाइक्कमे त्ति ॥ एते चोर्ध्वदिगाद्यतिक्रमा अनाभोगादिनातिचारतयावसेयाः ॥ १-३ ॥ खेत्तवुड्ढि त्ति एकतो योजनशतपरिमाणमभिगृहीतमन्यतो दशयोजनान्यभिगृहीतानि, ततश्च यस्यां दिशि दशयोजनानि तस्यां दिशि समुत्पन्ने कार्ये योजनशतमध्यादपनीयान्यानि

---

१ a c e मेलनेन। २ a c खेत्तादि, धणादि, दुपयादि। ३ a c e त्ति। ४ a c e प्रतिपत्स्यते। ५ a om.

दशयोजनानि तत्रैव स्वबुध्या प्रक्षिपति संवर्धयत्येकत इत्यर्थः। अयं चातिचारो व्रतसापेक्षत्वादवसेयः ॥ ४ ॥ सइअन्तरद्धा त्ति स्मृत्यन्तर्धा[१] स्मृत्यन्तर्धानं[२] स्मृतिभ्रंशः। "किं मया व्रतं गृहीतं, शतमर्यादया[३] पञ्चाशन्मर्यादया वा" इत्येवमस्मरणे योजनशतमर्यादायामपि पञ्चाशतमतिक्रामतो ऽयमतिचारो ऽवसेय इति ॥ ५ ॥

॥ ५१ ॥ भोयणओ कम्मओ य त्ति भोजनतो[४] भोजनमाश्रित्य बाह्याभ्यन्तरभोजनीयवस्तून्यपेक्ष्येत्यर्थः[५]। कर्मतः क्रीयां जीवनवृत्तिं बाह्याभ्यन्तरभोजनीयवस्तुप्राप्तिनिमित्तभूतामाश्रित्येत्यर्थः॥ सचित्ताहारे त्ति सचेतनाहारः पृथिव्यप्कायवनस्पतिजीवशरीराणां सचेतनानामभ्यवहरणमित्यर्थः। अयं चातिचारः कृतसचित्ताहारप्रत्याख्यानस्य कृततत्परिमाणस्य वानाभोगादिना प्रत्याख्यातं सचेतनं भक्षयतस्तदा प्रतीत्यातिक्रमादौ वर्तमानस्य ॥ १ ॥ सचित्तपडिबद्धाहारे त्ति सचित्ते वृक्षादौ प्रतिबद्धस्य गुन्दादेरभ्यवहरणम्। अथवा सचित्ते ऽस्थिके प्रतिबद्धं यत्पक्वमचेतनं खर्जूरफलादि तस्य "सास्थिकस्य कटाहमचेतनं भक्षयिष्यामीतरत्परिहरिष्यामि" इति भावनया मुखक्षेपणमिति। एतस्य चातिचारत्वं व्रतसापेक्षत्वादिति ॥ २ ॥ अपउलिओसहिभक्खणय त्ति[६] अपक्वाया[७] अग्निनासंस्कृताया ओषधेः[८] शाल्यादिकाया भक्षणता भोजनमित्यर्थः। अस्याप्यतिचारतानाभोगादिनैव, न तु सचित्ताहारातिचारेणैव। अस्य सङ्गृहीतत्वात्किं भेदोपादानेनेति।

---

१ e om. २ a om. ३ e adds वा after it. ४ e om. ५ c अपेक्षयेति। ६ e अपक्वौषधि°। ७ The reading of e is utterly corrupt here. ८ e औषधेः।

उच्यते, पूर्वोक्तपृथिव्यादिसचित्तसामान्यापेक्षया, ओषधीनां सदाभ्यवहरणत्वेन प्राधान्यख्यापनार्थं, दृश्यते च सामान्योपादाने सत्यपि प्राधान्यापेक्षया विशेषोपादानमिति ॥ ३ ॥ दुप्पउलिओसहिभक्खणया[1] दुःपक्का अस्विन्ना[2] ओषधयस्तद्भक्षणता। अतिचारता चास्य पक्वबुध्या भक्षयतः ॥ ३ ॥ तुच्छोसहिभक्खणय त्ति तुच्छा असारा ओषधयो ऽनिष्पन्नमुद्गफलीप्रभृतयः। तद्भक्षणे हि महती विराधना स्वल्पा च तत्कार्यहप्तिरिति। विवेकिनाचित्ताशिना ता[3] अचित्तीकृत्य न भक्षणीया भवन्ति। तत्करणेनापि भक्षणे ऽतिचारो भवति व्रतसापेक्षत्वात्तस्येति ॥५॥ इह च पञ्चातिचारा इत्युपलक्षणमात्रमेवावसेयं, यतो मधुमद्यमांसरात्रिभोजनादिव्रतिनामनाभोगातिक्रमादिभिरनेके ते[4] सम्भवन्तीति॥ कम्मओ णमित्यादि कर्मतो यदुपभोगव्रतं[5] "खरकर्मादिकं कर्म प्रत्याख्यामि" इत्येवंरूपं, तत्र श्रमणोपासकेन पञ्चदशकर्मादानानि वर्जनीयानि॥ इङ्गालकम्मे त्ति अङ्गारकरणपूर्वकस्तद्विक्रय एवं यदन्यदपि वह्निसमारम्भपूर्वकं जीवनमिष्टकाभाण्डकादिपाकरूपं तदङ्गारकर्मेति ग्राह्यं समानस्वभावत्वात्। अतिचारता चास्य कृतैतत्प्रत्याख्यानस्यानाभोगादिना, अत्रैव वर्त्तनादिति। एवं सर्वत्र भावना कार्या ॥१॥ नवरं वनकर्म वनस्पतिच्छेदनपूर्वकं तद्विक्रयजीवनम् ॥ २ ॥ शकटकर्म[6] शकटानां घटनविक्रयवाहनरूपम् ॥ ३ ॥ भाटककर्म मूल्यार्थं गन्त्र्यादिभिः

---

[1] e दुपक्कोसहि°। [2] e अचित्ता, e अग्निना अचित्ता। [3] a e om. [4] e om. [5] So c; but a उपभोगपरिभोगव्रतं, e उपरिभोगव्रतं। [6] See note 66 in the Translation.

परकीयभाण्डवहनम् ॥ ४ ॥ स्फोटकर्म कुद्दालहलादिभिर्भूमिदारणेन जीवनम् ॥ ५॥ दन्तवाणिज्यं[1] हस्तिदन्तशङ्खपूतिकेशादीनां तत्कर्मकारिभ्यः क्रयेण तद्विक्रयपूर्वकं जीवनम् ॥ ६ ॥ लाचावाणिज्यं[1] सञ्जातजीवद्रव्यान्तरविक्रयोपलक्षणम् ॥ ७॥ रसवाणिज्यं[1] सुरादिविक्रयः ॥ ८॥ विषवाणिज्यं[1] जीवघातप्रयोजनशस्त्रादिविक्रयोपलक्षणम् ॥ ९॥ केशवाणिज्यं[1] केशवतां दासगवोष्ट्रहस्त्यादिकानां विक्रयरूपम् ॥ १० ॥ यन्त्रपीडनकर्म यन्त्रेण तिलेक्षुप्रभृतीनां यत्पीडनरूपं कर्म तत् ॥ ११ ॥ तथा निर्लाञ्छनकर्म वर्धितकरणम् ॥ १२ ॥ दवाग्नेर्वनाग्नेर्दानं[2] वितरणं चेत्रादिशोधननिमित्तं दवाग्निदानमिति[3] ॥ १३ ॥ सरोह्रदतडागपरिशोषणता, तत्र सरः स्वभावनिष्पन्नं, ह्रदो नद्यादीनां निम्नतरः प्रदेशः, तडागं खननसम्पन्नमुत्तानविस्तीर्णजलस्थानम्। एतेषां शोषणं गोधूमादीनां वपनार्थम् ॥ १४॥ असतीजनपोषणता असतीजनस्य दासीजनस्य पोषणं, तद्भाटिकोपजीवनार्थं यत्तत्। तथा एवमन्यदपि क्रूरकर्मकारिणः प्राणिनः पोषणमसतीजनपोषणमेवेति ॥ १५॥

॥ ५२ ॥ कन्दप्पे त्ति कन्दर्पः कामस्तद्धेतुर्विशिष्टो वाक्प्रयोगोऽपि कन्दर्प उच्यते। रागोद्रेकात्प्रहासमिश्रं मोहोद्दीपकं नामेति भावः। अयं चातिचारः प्रमादाचरितलक्षणानर्थदण्डभेदव्रतस्य[4] सहसाकारादिनेति ॥ १ ॥ कुक्कुइए[5] त्ति कौत्कुच्यमनेकप्रकारा मुख-

---

१ a c e वाणिज्जं। २ e inserts दवग्गिदाणं before it. ३ e दावाग्निदानम् ४ c e ॰लक्षणा ऽनर्थ॰। ५ c कुक्कुइ त्ति, either an error for कुक्कुइए त्ति, or shortened for कुक्कुए त्ति।

नयनादिविकारपूर्विका परिहासादिजनिका[१] भाण्डानामिव विडम्बनक्रिया। अयमपि तथैव ॥ २ ॥ मोहरिए त्ति मौखर्यं धार्ष्ट्यप्रायमसत्यासम्बद्धप्रलापित्वमुच्यते। अयमतिचारः प्रमादव्रतस्य पापकर्मोपदेशव्रतस्य वानाभोगादिनैव ॥ ३ ॥ सञ्जुत्ताहिगरणे त्ति संयुक्तमर्थक्रियाकरणक्षममधिकरणमुदूखलमुसलादि। तदतिचारहेतुत्वादतिचारो हिंस्रप्रदाननिवृत्तिविषयः, यतो ऽसौ साक्षाद्यद्यपि हिंस्रं शकटादिकं न समर्पयति परेषां, तथापि तेन संयुक्तेन ते याचित्वाप्यर्थक्रियां कुर्वन्ति, विसंयुक्ते तु तस्मिंस्ते स्वत एव विनिवारिता भवन्ति ॥ ४ ॥ उवभोगपरिभोगाइरित्ते[२] त्ति उपभोगपरिभोगविषयभूतानि द्रव्याणि। स्नानप्रक्रमे उष्णोदकोद्वर्तनकामलकादीनि। भोजनप्रक्रमे अशनपानादीनि। तेषु यदतिरिक्तमधिकमात्मादीनामर्थक्रियासिद्धावप्यवशिष्यते तदुपभोगपरिभोगातिरिक्तम्। तदुपचारादतिचारः, तेन ह्यात्मोपभोगातिरिक्तेन परेषां स्नानभोजनादिभिरनर्थदण्डो भवति। अयं च प्रमादव्रतस्यैवातिचार इति ॥ ५ ॥

उक्ता गुणव्रतातिचाराः। अथ शिक्षाव्रतानां तानाह ॥

॥ ५३ ॥ सामाइयस्स त्ति समो रागद्वेषवियुक्तो[३] यः सर्वभूतान्यात्मवत्पश्यति, तस्य[४] यः प्रतिक्षणमपूर्वापूर्वज्ञानदर्शनचारित्रपर्यायाणां निरुपमसुखहेतुभूतानामधःकृतचिन्तामणिकल्पद्रुमोपमानां[५] लाभः समायः सः। प्रयोजनमस्यानुष्ठानस्येति सामायिकं, तस्य

---

१ c ॰जनिता। २ a c ॰परिभोगातिरित्ते, e ॰परिभोग om. ॰अइरित्ते। ३ c ॰विप्रमुक्तो। ४ a c तस्या। ५ e ॰मोपमानलाभः।

सावद्ययोगनिषेधरूपस्य निरवद्ययोगप्रतिषेधास्वभावस्य[1] च ॥ मण-दुप्पणिहाणे त्ति मनसो दुष्टं प्रणिधानं प्रयोगो मनोदुःप्रणिधानम्। कृतसामायिकस्य गृहे ऽतिकर्तव्यतायां सुकृतदुःकृतपरिचिन्तनमिति[2] भावः ॥१॥ वयदुप्पणिहाणे[3] त्ति कृतसामायिकस्य निष्ठुरसावद्यवाक्-प्रयोगः[4] ॥२॥ कायदुप्पणिहाणे त्ति कृतसामायिकस्याप्रत्युपे-क्षितादिभूतलादौ करचरणादीनां देहावयवानामनिभृतस्थापनमिति ॥३॥ सामाइयस्स सइअकरणय त्ति सामायिकस्य सम्बन्धिनी[5] या स्मृति "अस्यां वेलायां मया सामायिकं कर्तव्यं, तथा कृतं तन्न[6] वा[7]" इत्येवंरूपं स्मरणं, तस्याः[8] प्रबलप्रमादतयाकरणं स्मृत्यकरणम् ॥४॥ अणवट्ठियस्स करणय त्ति अनवस्थितस्याल्पकालीनस्यानियतस्य वा सामायिकस्य करणमवस्थितकरणमल्पकालकरणानन्तरमेव[9] त्यजति यथाकथञ्चिद्वा तत्करोतीति[10] भावः ॥५॥ इह चाद्यत्रयस्याना-भोगादिनातिचारत्वमितरद्वयस्य तु प्रमादबहुलतयेति ॥

॥५४॥ देसावगासियस्स त्ति दिग्व्रतगृहीतदिक्परिमाणस्यैक-देशो देशस्तस्मिन्नवकाशो गमनादिचेष्टास्थानं देशावकाशस्तेन निर्वृत्तं देशावकाशिकं, पूर्वगृहीतदिग्व्रतसङ्क्षेपरूपं सर्वव्रतसङ्क्षेपरूपं चेति ॥ आणवणप्पओगे[11] त्ति इह विशिष्टावधिके भूदेशाभिग्रहे[12] परतः स्वयं-गमनायोगाद्यदन्यः सचित्तादिद्रव्यानयने प्रयुज्यते, सन्देशकप्रदाना-

---

१ e ०प्रतिषेधाभावस्य, e ०प्रतिषेधस्वभावस्य। २ e दुःकृतचिन्तनम्। ३ a वइदु०। ४ e निठुर० ; e ०वाक्ययोगः। (a c spell निष्टुर०)। ५ c e सम्बन्धनी। ६ a तन्ने, e तच्च। ७ e च। ८ c तस्य, e तस्या। ९ a ०करणानांतरमेव, c ०करणांतरमेव। १० e om तत्। ११ a c e ०पओए। १२ c अवग्रहे।

दिना "त्वयेदमानेयम्" इत्यानयनप्रयोगः ॥१॥ पेसवणप्पओगे[1] त्ति बलाद्विनियोज्यः प्रेष्यस्तस्य प्रयोगो, यथाभिगृहीतप्रविचारदेशव्यतिक्रमभयात्[2] "त्वयावश्यमेव[3] गत्वा मम गवाद्यानेयमिदं वा तत्र कर्तव्यम्" इत्येवंभूतः प्रेष्यप्रयोगः ॥२॥ सद्दाणुवाए त्ति स्वगृहवृत्तिप्राकाराद्यवच्छिन्नभूप्रदेशाभिग्रहे[4] बहिः प्रयोजनोत्पत्तौ, तत्र स्वयंगमनायोगाद्वृत्तिप्राकारादिप्रत्यासन्नवर्तिनो बुद्धिपूर्वकमभ्युत्काशितादिशब्दकरणेन[5] समवसितकान्बोधयतः[6] शब्दानुपातः शब्दस्यानुपातनमुच्चारणं तादृशेन परकीयश्रवणविवरमनुपतत्यसाविति ॥३॥ रूवाणुवाए त्ति अभिगृहीतदेशाद्बहिः प्रयोजनभावे शब्दमनुच्चारयत एव परेषां स्वसमीपानयनार्थं स्वशरीररूपदर्शनं रूपानुपातः ॥४॥ बहियापोग्गलपक्खेवे त्ति अभिगृहीतदेशाद्बहिः प्रयोजनसद्भावे परेषां प्रबोधनाय लेष्ट्वादिपुद्गलप्रक्षेप इति भावना ॥५॥ इह चाद्यद्वयस्यानाभोगादिनातिचारत्वं, इतरस्य तु त्रयस्य व्रतसापेक्षत्वादिति॥

॥५५॥ पोसहोववासस्स त्ति इह पोषधशब्दो ऽष्टम्यादिपर्वसु रूढः, तत्र पोषधे उपवासः पोषधोपवासः, स चाहारादिविषयभेदाच्चतुर्विध इति, तस्य॥ अप्पडिलेहियेत्यादि अप्रत्युपेक्षितो जीवरक्षार्थं चक्षुषा न निरीक्षितः। दुःप्रत्युपेक्षित उद्भ्रान्तचेतोवृत्तितयासम्यगनिरीक्षितः। शय्या शयनं तदर्थं संस्तारकः कुशकम्बलफलकादिः शय्यासंस्तारकः। ततः पदत्रयस्य कर्मधारये भवत्यप्रत्युपेक्षितदुःप्रत्युपेक्षितशय्यासंस्तारकः[7]। एतदुपभोगस्यातिचारहेतुत्वादयमतिचार

---

१ a c e ॰पयोगे। २ a c e ॰प्रवीचार॰। ३ a c e अवस्यम्। ४ a प्रकाराद्य॰। ५ e अभ्युत्काशिता॰। ६ e बोधयन्। ७ a om. दुःप्रत्युपेक्षित।

उक्तः ॥ १ ॥ एवम प्रमार्जितदुःप्रमार्जितशय्यासंस्तारकोऽपि, नवरं प्रमार्जनं वसनाञ्चलादिना ॥ २ ॥ एवमितरौ द्वौ, नवर मुच्चारः पुरीषं, प्रस्रवणं मूत्रं, तयोर्भूमिः[1] स्थण्डिलम् ॥ ३, ४ ॥ एते चत्वारोऽपि प्रमादितयातिचाराः ॥ पोसहोववासस्स सम्मं अणणुपालणय त्ति कृतपोषधोपवासस्यास्थिरचित्ततयाहारशरीरसत्काराब्रह्मव्यापाराणामभिलषणादननुपालना पोषधस्येति । अस्य चातिचारत्वं भावतो विरतेर्बाधितत्वादिति[2] ॥

॥ ५६ ॥ अहासंविभागस्स त्ति अह त्ति यथासिद्धस्य स्वार्थं[3] निर्वर्तितस्येत्यर्थः, अशनादेः समितिसङ्गतत्वेन पश्चात्कर्मादिदोषपरिहारेण विभजनं साधवे दानद्वारेण विभागकरणं यथासंविभागः । तस्य ॥ सचित्तनिक्खेवणयेत्यादि[4] सचित्तेषु व्रीह्यादिषु निक्षेपणमन्नादेरदानबुध्या मातृस्थानतः सचित्तनिक्षेपणम् ॥ १ ॥ एवं सचित्तेन फलादिना स्थगनं सचित्तपिधानम् ॥ २ ॥ कालातिक्रमः कालस्य साधुभोजनकालस्यातिक्रम उल्लङ्घनं कालातिक्रमः । अयमभिप्रायः, "कालमूनमधिकं वाज्ञात्वा[5] साधवो न ग्रहीष्यन्ति[6], ज्ञास्यन्ति च यथायं ददाति" एवं विकल्पतो दानार्थमभ्युत्थानमतिचार इति ॥ ३ ॥ तथा परव्यपदेशः "परकीयमेतत्तेन साधुभ्यो न दीयते" इति साधुसमक्षं भणनं, "जानन्तु साधवो यद्यस्यैतद्भक्तादिकं भवेत्तदा कथमस्मभ्यं न दद्याद्" इति साधुसम्प्रत्ययार्थम्[7] । अथवा "अस्माद्दानान्मम मात्रादेः

---

१ c e insert निमित्तं after तयोर् । २ c बोधित्वाद् । ३ a स्वर्थं । ४ a ॰निक्खिविणएत्यादि, c e ॰निक्खेवणेत्यादि । ५ e चाज्ञात्वा । ६ a ग्टहीष्यन्ते, c e ग्टहीष्यन्ति । ७ c ॰सम्प्रत्ययार्थभणनम्

पुण्णमस्ति"[२] इति भणनमिति ॥ ४ ॥ मत्सरिता[१] "अपरेणेदं दत्तं, किमहं तस्मादपि कृपणो हीनो वातो ऽहमपि ददामि" इत्येवंरूपो दानप्रवर्तकविकल्पो मत्सरिता ॥ ५ ॥ एते चातिचारा एव, न भङ्गा, दानार्थमभ्युत्थानपरिणतेश्च[२] दूषितत्वाद्भङ्गस्वरूपस्य चेहैवमभिधानाद्, यथा ।

दाणन्तराय दोसा न देइ, दिज्जन्तयं च वारेइ ।
दिन्ने[३] वा परितप्पइ इति किवणत्ता भवे भङ्गो ॥

आवश्यकटीकायां हि न भङ्गातिचारयोर्विशेषो[४] ऽस्माभिरवबुद्धः, केवलमिह भङ्गाद्विवेकं कुर्वद्भिरस्माभिरतिचारा व्याख्याताः। सम्प्रदायान्नवपदादिषु तथा दर्शनात् ।

जारिसओ जइभेओ जह जायइ जह व तत्थ[५] दोसगुणा ।
जयणा जह अइयारा भङ्गा तह भावणा नेया ॥

इत्यस्या आवश्यकचूर्णौ पूर्वगतगाथाया दर्शनादतिचारशब्दस्य सर्वभङ्गे प्रायो ऽप्रसिद्धत्वाच्च। ततो नेदं[६] शङ्कनीयं[७], य एते ऽतिचारा उक्तास्ते भङ्गा एवेति। तथा[८] य[९] एते प्रतिव्रतं पञ्चपञ्चातिचारास्त[९] उपलक्षणमतिचारान्तराणामवसेया, न त्ववधारणम्। यदाहुः पूज्याः।

पञ्चपञ्चाइयारा ओ सुत्तम्मि जे पदंसिया ।
ते नावहारणट्ठाए किन्तु ते उवलक्खणं ॥

इति[१०]। इदं चेह तत्त्वं। यत्र व्रतविषये ऽनाभोगादिनातिक्रमा-

---

१ c मत्स्यारिता, e मत्स्यरिता। २ c e दानार्थमभ्युत्थानं दानपरिणतेश्च। ३ a c e दिन्ने। ४ c e नवभङ्ग॰। ५ c वइच्छ for व तत्थ। ६ c नैवं। ७ c e शङ्कनीये एते। ८ c e यथा। ९ c e ये, ते। १० a e ति, c om. ति।

दिपदत्रयेण वा स्वबुद्धिकल्पनया वा व्रतसापेक्षतया व्रतविषयं परि-हरतः[१] प्रवृत्तिः सो ऽतिचारो, निरपेक्षतायां तु भङ्ग इत्येवं सङ्कीर्णातिचारपदगमनिका कार्या। अथ सर्वविरतावेवातिचारा भवन्ति, देशविरतौ तु भङ्गा एव। यदाह।

सव्वे वि य अइयारा सञ्जलणाणं तु उदयत्रो हुन्ति।
मूलच्छेज्जं पुण होइ बारसण्हं कसायाणं॥

अत्रोच्यते इयं हि गाथा सर्वविरतावेवातिचारभङ्गोपदर्शनार्था[२], न देशविरत्यादिभङ्गदर्शनार्था। तथैव वृत्तौ व्याख्यातत्वात्। तथा सञ्ज्वलनोदयविशेषे सर्वविरतिविशेषस्यातिचारा एव भवन्ति, न मूलच्छेद्यम्। प्रत्याख्यानावरणादीनां तूदये पश्चानुपूर्व्या सर्वविर-त्यादीनां मूलतः छेदो भवतीत्येवंभूतव्याख्यानान्तरे ऽपि न देश-विरत्यादावतिचाराभावः सिध्यति। यतो यथासंयतस्य चतुर्था-नामुदये यथाख्यातचारित्रं भ्रश्यति, इतरचारित्रं[३] सम्यक्त्वं च साति-चारमुदयविशेषान्निरतिचारं च[४] भवतीति। एवं तृतीयोदये सरा-गचरणं[५] भ्रश्यति, देशविरतिसम्यक्त्वे सातिचारे निरतिचारे[६] च प्रत्येकं तथैव स्याताम्। द्वितीयोदये देशविरतिर्भ्रश्यति, सम्यक्त्वं तु तथैव द्विधा स्यात्। प्रथमोदये तु सम्यक्त्वं भ्रश्यतीति। एवं चैतत्, कथमन्यथा सम्यक्त्वातिचारेषु देशिकेषु प्रायश्चित्तं तप एव निरूपितं, सार्विकेषु तु[७] मूलमिति। अथानन्तानुबन्ध्यादयो द्वादश कषायाः सर्वघातिनः, सञ्ज्वलनास्तु देशघातिन इति। ततश्च सर्वघातिना-

---

१ e परिहारः। २ e °दर्शनार्थं। ३ e इतरचारित्रं। ४ e om. च। ५ e सरागावरणं प्रणश्यति। ६ e निरतिचारेषु om. च। ७ e om. तु।

मुदये मूलस्यैव, देशघातिनां त्वतिचार इति मतं, किन्तु यदे-तत्सर्वघातित्वं द्वादशानां कषायाणां, तत्सर्वविरत्यपेक्षमेव शतक-चूर्णिकारेण व्याख्यातं, न तु सम्यक्त्वाद्यपेक्षमिति। तथा हि तद्वाक्यं "भगवप्पणीयं[1] पञ्चमहव्वयमइयं अट्ठारससीलङ्गसहस्सकलियं चारित्तं घाएन्ति त्ति सव्वघाइणो" त्ति। किञ्च प्रागुपदर्शितायाः[2] "जारि-सश्रो" इत्यादि गाथायाः सामर्थ्यादतिचारभङ्गौ देशविरतिसम्य-क्त्वयोः प्रतिपत्तव्याविति॥

॥५७॥ **अपच्छिमे**त्यादि पश्चिमैवापश्चिमा, मरणं प्राणत्याग-लक्षणं, तदेवान्तो मरणान्तः, तत्रभवा मारणान्तिकी[3], संलिख्यते कृशीक्रियते शरीरकषायाद्यनयेति **संलेखना** तपोविशेषलक्षणा, ततः पदत्रयस्य कर्मधारयः, तस्या **जोषणा**[4] सेवना, तस्या **आराधना** अखण्डकालकरणमित्यर्थः, अपश्चिममारणान्तिकसंलेखनाजोषणारा-धना, तस्याः॥ **इहलोगे**त्यादि इहलोको मनुष्यलोकः, तस्मिन्नाशंसा-भिलाषः, तस्याः प्रयोग इहलोकाशंसाप्रयोगः। "श्रेष्ठी स्यां जन्मान्तरे ऽमात्यो वा" इत्येवंरूपा[5] प्रार्थना॥१॥ एवं **परलोकाशंसाप्रयोगो,** "देवो ऽहं स्याम्" इत्यादि॥२॥ **जीविताशंसाप्रयोगो** जीवितं प्राणधारणं तदाशंसायास्तदभिलाषस्य प्रयोगो, "यदि बहुकालमहं जीवेयम्" इति। अयं हि संलेखनावान्कश्चिद्वस्त्रमाल्यपुस्तक-वाचनादिपूजादर्शनाद्बहुपरिवारावलोकनाल्लोकश्लाघाश्रवणाच्चैवं मन्येत, यथा "जीवितमेव श्रेयः, प्रतिपन्नानशनस्यापियत एवंविधा मदुद्देशेन

---

1 a भगवयाप्पणीयं, c e भगवतप्पणीयं। 2 c प्रागुक्तोपदिदर्शितायाः, e प्रागुक्तोप-र्शितायाः। 3 e ०न्तिका। 4 e झोषणा। 5 a एवंरूपप्रार्थना।

विभूतिर्वर्तते" इति ॥ ३ ॥ मरणाशंसाप्रयोग उक्तस्वरूपपूजाद्यभावे भावयत्यसौ "यदि शीघ्रं म्रियेऽहम्" इति स्वरूप इति ॥ ४ ॥ कामभोगाशंसाप्रयोगो, "यदि मे मानुष्यकामभोगादिव्यापारा:[१] सम्पद्यन्ते तदा साधु" इति विकल्परूप:[२] ॥ ५ ॥

॥५८॥ नो खलु इत्यादि नो खलु मम भदन्त भगवन्कल्पते युज्यते। अद्यप्रभृति इतः सम्यक्त्वप्रतिपत्तिदिनादारभ्य निरतिचारसम्यक्त्व-परिपालनार्थं तद्यतनामाश्रित्य। अन्नउथिए व त्ति जैनयूथाद्यदन्ययूथं सङ्घान्तरं तीर्थान्तरमित्यर्थः, तदस्ति येषां ते ऽन्ययूथिकाश्चरकादिकु-तीर्थिकाः, तान्। अन्ययूथिकदैवतानि वा हरिहरादीनि। अन्ययूथिक-परिगृहीतानि वा चैत्यानि[३] अर्हत्प्रतिमालक्षणानि, यथा भौतप-रिगृहीतानि वीरभद्रमहाकालादीनि। वन्दितुं वा अभिवादनं कर्तुम्। नमस्यितुं[४] वा प्रणामपूर्वकं प्रशस्तध्वनिभिर्गुणोत्कीर्तनं कर्तुम्[४]। तद्भक्तानां मिथ्यात्वस्थिरीकरणादिदोषप्रसङ्गादित्यभिप्रायः॥ तथा पूर्वं प्रथममनालप्तेन सता अन्यतीर्थिकैः, तानेव। आलपितुं वा सकृत्सम्भाषितुम्। संलपितुं वा पुनःपुनः संलापं कर्तुम्। यतस्ते तप्ततरायोगोलकल्पाः[५] खल्वासनादिक्रियायां नियुक्ता भवन्ति, तत्प्र-त्ययश्च कर्मबन्धः स्यात्। तथालापादेः सकाशात्परिचयेन तस्यैव तत्परिजनस्य वा मिथ्यात्वप्राप्तिरिति। प्रथमालप्तेन त्वसम्भ्रमं लोका-पवादभयात् "कीदृशस्त्वम्" इत्यादि वाच्यमिति॥ तथा तेभ्योऽन्य-यूथिकेभ्यो ऽशनादि दातुं वा सकृत्, अनुप्रदातुं वा पुनःपुनरित्यर्थः ॥

१ a मानुष्यकाः कामभोगादिव्यावा सम्पद्यन्ते। २ a विकल्परूप, c e विकल्परूपा। ३ c e अर्हच्चैत्यानि। ४ a नमःस्यतुं, c नमयितुं, e नमस्यतुं। ५ c e ॰योगोलककल्पाः।

अयं च निषेधो धर्मबुध्येव, करुणया तु दद्यादपि॥ किं सर्वथा न कल्पत इत्याह। नन्नत्थ रायाभिओगणं ति न इति न कल्पत इति यो ऽयं निषेधः, सो ऽन्यत्र राजाभियोगात्, हतीयायाः पञ्चम्यर्थत्वाद्राजाभियोगं वर्जयित्वेत्यर्थः। राजाभियोगस्तु राजपरतन्त्रता। गणः समुदायस्तदभियोगो वश्यता गणाभियोगस्तस्मात्। बलाभियोगो नाम राजगणव्यतिरिक्तस्य बलवतः पारतन्त्र्यम्। देवताभियोगो देवपरतन्त्रता। गुरुनिग्गहो मातापितृपारवश्यं, गुरूणां वा चैत्यसाधूनां निग्रहः प्रत्यनीककृतोपद्रवो गुरुनिग्रहः, तत्रोपस्थिते तद्रक्षार्थमन्ययूथिकादिभ्यो ददद्पि[1] नातिक्रामति सम्यक्त्वमिति॥ वित्तिकन्तारेणं[2] ति वृत्तिर्जीविका, तस्याः कान्तारमरण्यं तदिव कान्तारं चेत्रं कालो वा वृत्तिकान्तारं निर्वाहाभाव इत्यर्थः। तस्मादन्यत्र निषेधो दानप्रणामादेरिति प्रकृतमिति॥ पडिग्गहं ति पात्रम्। पीढं ति पट्टादिकम्। फलगं ति अवष्टम्भादिकं फलकम्। भेसज्जं[3] ति पथ्यम्॥ अट्ठाइं ति उत्तरभूतानर्थानाददाति॥

॥५८॥ लक्करण इत्यत्र यावत्करणाल्लङ्करणजुत्तजोइयमित्यादिर्यानवर्णको व्याख्यास्यमानसप्तमाध्ययनवदवसेयः॥

॥६६॥ महावीरस्स अन्तियं ति अन्तेभवा आन्तिकी[4] महावीरसमीपाभ्युपगतेत्यर्थः[5]। तां धम्मपण्णत्तिं ति धर्मप्रज्ञापनामुपसम्पद्याङ्गीकृत्यानुष्ठानद्वारतः[6]। जहा पूरणो त्ति भगवत्यभिहितो

---

१ a c f h ददपि। २ a c e वित्तीकन्तारेणं। ३ a भेसज्ज त्ति। ४ c आन्तिका। ५ a f ०पाभ्युपगमेत्य०। ६ c प्रज्ञापनम्।

बलतपस्सी[१]। स यथा स्वस्थाने पुत्रादिस्थापनमकरोत्, तथायं कृतवानित्यर्थः। एवं चासौ कृतवान्, विउलं असणपाणखाइमसाइमं उवक्खडावित्ता, मित्तनाइनियगसम्बन्धिपरिजणं आमन्तेत्ता, तं मित्तनाइनियगसम्बन्धिपरिजणं विउलेणं ४ वत्यगन्धमल्लालङ्कारेण य[२] सक्कारेत्ता सम्माणेत्ता, तस्सेव मित्तनाइनियगसम्बन्धिपरिजणस्स पुरओ जेट्ठपुत्तं कुडुम्बे[३] ठावित्त त्ति ॥ नायकुलंसि त्ति स्वजनगृहे ॥

॥६८॥ उवक्खडेउ[४] त्ति उपस्करोतु राध्यतु। उवकरेउ त्ति उपकरोतु, सिद्धं सद्[५] द्रव्यान्तरैः कृतोपकारमाहितगुणान्तरं विदधातु ॥

॥७०॥ पढमं ति एकादशानामाद्यामुपासकप्रतिमां श्रावकोचिताभिग्रहविशेषरूपामुपसम्पद्य विहरति। तस्याश्चेदं स्वरूपम्।

सङ्कादिसल्लविरहियसम्मद्दंसणजुओ[६] उ[७] जो जन्तू[८]।
सेसगुणविप्पमुक्को, एसा खलु होइ पढमा ओ[९] ॥

सम्यग्दर्शनप्रतिपत्तिश्च तस्य पूर्वमप्यासीत्। केवलमिह शङ्कादिदोषराजाभियोगाद्यपवादवर्जितत्वेन तथाविधसम्यग्दर्शनाचारविशेषपालनाभ्युपगमेन च प्रतिमात्वं सम्भाव्यते। कथमन्यथासावेकमासं प्रथमायाः प्रतिमायाः[१०] पालनेन, द्वौ मासौ द्वितीयायाः पालनेन, एवं[११] यावदेकादश मासानेकादश्याः पालनेन पञ्चसार्धानि वर्षाणि

---

१ c e बालतपस्सी। २ e om य। ३ c कुटम्बे, e कुटुम्बे। ४ See footnote to tha translation. ५ a f सत (error for स्), c तु, e स च। ६ a c e f h ॰विरहित॰। ७ e om उ; see Hemachandra ii, 203, 211; it is a shorter form of श्रो or उञ्। ८ c जुत्ता, om. जो। ९ a f उ; see footnote ७ १० a f om. ११ a om.

पूरितवानित्यर्थतो[1] वक्ष्यतीति। न चायमर्थो दशाश्रुतस्कन्धादावुपलभ्यते अद्धामात्रत्पायास्तत्र तस्याः प्रतिपादनात्॥ **अहासुत्तं** ति सूत्रानतिक्रमेण। **यथाकल्पं** प्रतिमाचारानतिक्रमेण। **यथामार्गं** चायोपशमिकभावानतिक्रमेण। **अहातच्चं** ति यथातत्त्वं दर्शनप्रतिमेति शब्दस्यान्वर्थानतिक्रमेण। **फासेइ** त्ति स्पृशति प्रतिपत्तिकाले विधिना प्रतिपत्तेः। **पालेइ** त्ति सततोपयोगप्रतिजागरणेन रचति। **सोहेइ** त्ति शोभयति गुरुपूजापुरस्सरपारणकरणेन शोधयति वा निरतिचारतया। **तीरेइ** त्ति पूर्णेऽपि कालावधावनुबन्ध्यात्यागात्[2]। कीर्तयति तत्समाप्तौ "इदमिदं चेहादिमध्यावसानेषु कर्त्तव्यं तच्च मया कृतम्" इति कीर्तनात्। आराधयति एभिरेव प्रकारैः सम्पूर्णैर्निष्ठां नयतीति॥ **दोच्चं** ति द्वितीयां व्रतप्रतिमाम्। इदं चास्याः स्वरूपम्।

> दंसणपडिमाजुत्तो पालेन्तो[3]ऽणुव्वए निरइयारे।
> अणुकम्पाइगुणजुओ जीवो[4], इह होइ वयपडिमा॥

**तच्चं** ति तृतीयां सामायिकप्रतिमाम्। तत्स्वरूपमिदम्।

> वरदंसणवयजुत्तो सामइयं[5] कुणइ जो उ सञ्झासु।
> उक्कोसेण तिमासं, एसा सामाइयप्पडिमा॥

**चउत्थं** ति चतुर्थीं[6] पोषधप्रतिमामेवंरूपाम्।

> पुव्वोदियपडिमजुओ पालइ जो पोसहं तु सम्पुण्णं[7]।
> अट्ठमिचउद्दसाइसु चउरो मासे[8], चउत्थी[9] सा॥

---

१ e अर्थः ततो। २ a ०त्यागन। ३ c e h पालन्तो। ४ c ०जुत्तजीवो। ५ c e h सामाइयं। ६ e चतुर्थी पोषधप्रतिमैवंरूपा। ७ e सम्पत्तम्। ८ e मासा। ९ a f h चउत्थे।

पञ्चमं ति पञ्चमीं प्रतिमाप्रतिमां[1] कायोत्सर्गप्रतिमामित्यर्थः। स्वरूपं चास्याः।

सम्ममणुव्वयगुणवयसिक्खावयवं थिरो य नाणी य।
अट्ठमिचउद्दसीसुं पडिमं ठा एगराईयं[2] ॥
असिणाणवियडभोई मउलिकडो[3] दिवसबम्भयारी य।
राइं परिमाणकडो पडिमावज्जेसु दियहेसु ॥
झायइ पडिमाए ठिओ[4] तिलोयपुज्जे जिणे[5] जियकसाए।
नियदोसपच्चणीयं अण्णं वा पञ्च जा मासा ॥

अस्नानो ऽरात्रिभोजी चेत्यर्थः। मुकुलकच्छ[6] इत्यर्थः ॥

छट्ठं ति षष्ठीं अब्रह्मवर्जनप्रतिमाम्। एतत्स्वरूपं चैवम्।

पुव्वोदियगुणजुत्तो विसेसओ विजियमोहणिज्जो[7] य।
वज्जइ अबम्भमेगन्तओ उ राइं पि थिरचित्तो ॥
सिङ्गारकहाविरओ इत्थीए समं रहम्मि[8] नो ठाइ।
चयइ य अइप्पसङ्गं तहा विभूसं च उक्कोसं ॥
एवं जा[9] छम्मासा एसो हि गओ उ[10] इयरहा दिट्ठं।
जावज्जीवं पि इमं वज्जइ एयम्मि लोगम्मि ॥

सत्तमं ति सप्तमीं सचित्ताहारवर्जनप्रतिमामित्यर्थः। इयं चैवम्।

सच्चित्तं आहारं वज्जइ असणाइयं निरवसेसं।
सेसपयसमाउत्तो[11] जा मासा सत्त विहिपुव्वं ॥

---

१ c has only प्रतिमां omitting प्रतिमा, e प्रतिमां प्रातिमं। २ e गएगराइयम्। ३ c मउडीकलो। ४ a f h द्विउ। ५ c om. जिणे। ६ a मुक्कलकच्छ; c e मुत्कलकच्छ; cf. मुत्तकच्छ। ७ c e विजय०। ८ c रहंसि। ९ c e जावच्छम्मा। १० c e om. उ। ११ c ०वय०।

अट्ठम ति अष्टमीं स्वयमारम्भवर्जनप्रतिमाम्। तद्रूपमिदम्।

वज्जइ सयमारम्भं सावज्जं, कारवेइ पेसेहिं।
वित्तिनिमित्तं पुव्वयगुणजुत्तो अट्ठ जा मासा॥

नवम ति नवमीं भृतकप्रेष्यारम्भवर्जनप्रतिमाम्[१]। सा चेयम्।

पेसेहिं आरम्भं सावज्जं कारवेइ नो गुरुयं।
पुव्वोइयगुणजुत्तो नव मासा जाव विहिणा ओ[२]॥

दसम ति दशमीं उद्दिष्टभक्तवर्जनप्रतिमाम्। सा चैवम्।

उद्दिट्ठकडं भत्तं पि वज्जए किमुय सेसमारम्भं।
सो होइ य[३] खुरमुण्डो सिहलिं वा धारए[४] कोइ॥
दव्वं पुट्ठो जा[५] णं जाणेइ इ[६] वयइ नो इ नो वेइ।
पुव्वोदियगुणजुत्तो दस मासा कालमाणेणं[७]॥

एक्कारसम ति एकादशीं श्रमणभूतप्रतिमाम्। तत्स्वरूपं चैतत्।

खुरमुण्डो लोएण[८] व[९] रयहरणं[१०] ओग्गहं[११] च घेत्तूण।
समणब्भूओ विहरइ धम्मं काएण फासेन्तो[१२]॥
एवं उक्कोसेणं एक्कारस मास[१३] जाव विहरेइ।
एक्काहाइपरेणं[१४] एवं सव्वत्थ पाएणं॥

इति॥

॥ ७२॥ उरालेणम् इत्यादिर्वर्णको मेघकुमारतपोवर्णक इव व्याख्येयः। यावदनवकाङ्क्षन्विहरतीति॥

१ This clause and verse is very corrupt in e. २ a उ। ३ e om. य। ४ a e धारते कोति e धारए कोवि। ५ a जो णं, e जाणे। ६ a इ वयइ नो वेति, c वयइ तो य नो वेइ, e वयइ ना वेति। ७ c ॰मासेणं। ८ e लोए, h लोएणं। ९ a f च। १० e यरहरणं e यवरहरण। ११ a c f h उग्गहं, e पडिग्गहं। १२ c e h फासन्ता। १३ a मासल्ल जाव, f मासभ जाव। १४ एक्काहाईण।

॥ ८३ ॥ [illegible] त्ति गृहमध्यावसतः, गेहे वर्त्त-मानस्येत्यर्थः ॥

॥ ८५ ॥ [illegible]त्यादय[1] एकार्थाः शब्दाः ॥

॥ ८६ ॥ [illegible] त्ति हे गौतम इत्येवमामन्त्र्येति[2] ॥

[illegible] त्ति निगमनं, यथा "एवं खलु जम्बू समणेणं जाव उवासगदसाणं पढमस्स अज्झयणस्स अयमट्ठे पन्नत्ते त्ति बेमि" ॥

॥ उपासकदशानां प्रथमाध्ययनं समाप्तम् ॥

द्वितीयमध्ययनम् ॥

अथ द्वितीये किमपि लिख्यते ॥

॥ ९३ ॥ [illegible] त्ति पूर्वरात्रश्चाऽावपररात्र-श्चेति पूर्वरात्रापररात्रः[3], स एव कालसमयः[4] कालविशेषः ॥

॥ ९४ ॥ तत्र [illegible] त्ति वर्णकव्यासो वर्ण-कविस्तरः ॥ [illegible] ति शिरः । से तस्य । [illegible][5] त्ति गवां चरणार्थं यद्वंशदलमयं[6] महद्भाजनं, तद्गोकिलञ्जं डल्ले त्ति यद्-च्यते, तस्याधोमुखीकृतस्य यत्संस्थानं, तेन संस्थितं तदाकारमित्यर्थः । पुस्तकान्तरे विशेषान्तरमुपलभ्यते । विगयकप्पयनिभं ति विकृतो

---

१ a f h सव्वाणम्, c e सत्ताणम् । २ f इत्येदं चामं० । ३ e पूर्वरात्रावपररात्रः । ४ e कालः समयः । ५ a e f गोकिलिंज, but immediately afterwards गोकि-लंज. as in A B D E F; Skr. गोकिलिञ्ज or गोकिलिञ्च, cf. Marāṭhī किलच or किलीच । ६ e ०दलमयमहद्भाजनं ।

योऽलञ्जरादीनां[१] कल्प एव कल्पकः छेदः खण्डं कर्परमिति तात्पर्यं, तन्निभं तत्सदृशमिति ॥ क्वचित्तु वयडकोप्परनिभं त्ति दृश्यते, तच्चोपदेशगम्यम् ॥ सालिभसेल्लसरिसा व्रीहिकणिशशूकसमाः[२] से तस्य केशा वालाः । एतदेव व्यनक्ति, कविलतेएणं दिप्पमाणा[३] पिङ्गलदीप्त्या[४] रोचमानाः ॥ उट्टियाकभल्लसंठाणसंठियं उष्ट्रिका मृण्मयो महाभाजनविशेषस्तस्याः कभल्लं कपालं, तस्य[५] यत्संस्थानं तत्संस्थितम् । निडालं त्ति ललाटम् ॥ पाठान्तरे । महल्लउट्टियाकभल्लसरिसोवमे[६] महोष्ट्रिकाकपालसदृशमित्येवमुल्लेखेनोपमा[७] उपमानवाक्यं यत्र तत्तथा ॥ मुगुंसपुंछं[८] व भुजपरिसर्पविशेषो मुगुंसा, सा[९] च खाडहिल्ल त्ति सम्भाव्यते, तत्पुच्छवत् । तस्येति पिशाचरूपस्य भुमगाओ[१०] त्ति भ्रुवौ प्रस्तुतोपमार्थमेव व्यनक्ति, फुग्गफुग्गाओ[११] त्ति परस्परासम्बद्धरोमिके विकीर्णविकीर्णरोमिके[१२] इत्यर्थः ॥ पुस्तकान्तरे तु जडिलजडिलाओ[१३] त्ति प्रतीतम् ॥ विगयबीभच्छदंसणाओ त्ति विकृतं बीभत्सं च दर्शनं रूपं ययोस्ते तथा ॥ सीसघडिविणिग्गयाणि शीर्षमेव घटी तदाकारत्वात् शीर्षघटी[१४], तस्या विनिर्गते इव विनिर्गते शिरोघटीमतिक्रम्य व्यवस्थितत्वात् । अच्छिणी लोचने, विकृतबीभत्सदर्शने प्रतीतम् ॥ कण्णा श्रवणौ यथा शूर्प-

---

१ a e f खरञ्जरादीनां । २ e f व्रीही° । ३ a f दिप्पमाणे, apparently intended as a nom. plur. ending in ए, see E. Müller's *Beiträge zur Jaina Grammatik*, p. 50, Bhag., p. 418. ४ a f पिंपल° । ५ e तत्संस्थानं । ६ e महिल्ल° । ७ e °मदृशमित्येव ममुल्लेखेनोपमा । ८ e मगुंसपुच्छं, f मुंगुंस° । ९ e om. सा । १० e भूमगाउ, f भुमगाउ । ११ a फुग्गाओ । १२ e om. one विकीर्ण । १३ a f जटिलजडिलाउ, e जटिलजटिलाउ । १४ e °घटिः ।

कर्त्तरमेव शूर्पखण्डमेव नान्यथाकारौ टप्पराकारावित्यर्थः। विकृतेत्यादि तथैव॥ उरब्भपुडसन्निभा उरभ्र उरणस्तस्य[१] पुटं नासापुटं, तत्सन्निभा तत्सदृशी नासा नासिका॥ पाठान्तरेण[२] ऊरब्भपुडसंठानसंठिया, तत्र ऊरब्भा[३] वाद्यविशेषस्तस्याः पुटं पुष्करं तत्संस्थानसंस्थिता[४] अतिचिपिटत्वेन[५] समत्वादिति॥ झुसिर त्ति महारन्ध्रा, जमलचुल्लीसंठाणसंठिया यमलयोः समस्थितद्वयरूपयो चुल्ल्योर्यत्संस्थानं[६] तत्संस्थिते द्वे अपि तस्य नासापुटे नासिकाविवरे॥ वाचनान्तरे महल्लकुब्बसंठिया[७] दो वि से[८] कवोला, तत्र क्षीणमांसत्वादुन्नतास्थित्वाच्च[९] कुब्बं[१०] ति निम्नं क्षाममित्यर्थः। तत्संस्थितौ द्वावपि से तस्य कपोलौ गण्डौ॥ तथा घोडय[११] त्ति घोटकपुच्छवदश्ववालधिवत्तस्य पिशाचरूपस्य श्मश्रूणि[१२] कूर्चकेशाः। तथा कपिलकपिलानि अतिकडाराणि विकृतानीत्यादि तथैव॥ पाठान्तरेण घोडयपुंछं[१३] व तस्स कविलफरुसाओ उद्धलोमाओ[१४] दाढियाओ[१५], तत्र परुषे[१६] कर्कशस्पर्शे ऊर्ध्वरोमिके[१७] न तिर्यगवनते इत्यर्थः। दंष्ट्रिके उत्तरौष्ठरोमाणि[१८]॥ ओष्ठौ[१९] दशनच्छदौ

---

१ a e f उरण॰। २ e पाठान्तरे। ३ e ऊरब्भो। ४ e ॰संस्थाने संस्थिता। ५ e चिपटत्वेन। ६ a f तुल्योर, e चुल्लोर्। ७ So e here, while afterwards it has कुच्चं; but a f have ॰कुच्च॰ here, but afterwards कुब्बं; Skr. कुब्रम् 'a hole', 'a cavity'; the Marāṭhī has a word कुचा or कुच्चा (or गुच्चा) 'a dint', 'a depression'. ८ e ते। ९ a e f ॰मांसत्वात् उन्नता॰। १० a f कुंव्वं, e कुच्चं। ११ a f om. घोडय त्ति। १२ a श्मश्रूणि, f श्रूस्मणि। १३ a e f ॰पुच्छं। १४ e उद्देलोमाओ, f उद्धलोमा। १५ So e; but a f दाडियाओ (see Hem. II, 139). १६ e फरुषे। १७ a e f ऊर्द्ध॰। १८ a e f उत्तरौष्ट॰। १९ a e f ओष्टौ।

उष्ट्रस्येव लंम्बौ[1] प्रलम्बमानौ ॥ पाठान्तरेण उट्टा से घोडगस्स जहा दो वि लम्बमाणा ॥ तथा फाला[2] लोहमयकुशाः, तत्सदृशा दीर्घत्वात्, से तस्य दन्ता दशनाः[3] ॥ जिब्भा यथा शूर्पकर्त्तरमेव नान्यथाकारा, विकृतेत्यादि तदेव ॥ पाठान्तरे हिङ्गुलुयधाउकन्दरविलं व[4] तस्स वयणं इति दृश्यते । तत्र हिङ्गुलुको वर्णद्रव्यं तद्रूपो धातुर्यत्र तत्, तथाविधं यत्कन्दरविलं गुहालक्षणं रन्ध्रं तदिव तस्य वदनम् ॥ हलकुद्दाल[5] हलस्योपरि ततो भागः, तत्संस्थिते तदाकारे अतिवक्रदीर्घे से तस्य हणुय त्ति दंष्ट्राविशेषौ[6] ॥ गल्लकडिल्लं च तस्स त्ति गल्ल एव कपोल एव कडिल्लं मण्डकादिपचनभाजनं गल्लकडिल्लं, चः[8] समुच्चये, तस्य पिशाचरूपस्य । खड्ड[9] त्ति गर्त्ताकारं[10] निम्नमध्यभागमित्यर्थः । फुट्टं ति विदीर्णं, अनेनैव साधर्म्येण[11] कडिल्लमित्युपमानं कृतम् । कविलं ति वर्णतः । फरुसं ति स्पर्शतः । महल्लं ति महत् ॥ तथा मृदङ्गाकारेण मर्दलाकृत्या उपमा यस्य स मृदङ्गाकारोपमः । से तस्य स्कन्धोऽंशदेशः ॥ पुरवरे[12] त्ति पुरवरकपाटोपमं से तस्य वच्छ उरःस्थलं विस्तीर्णत्वादिति ॥ तथा कोट्ठिका[13] लोहादिधातुधमनार्थं मृत्तिकामयी कुशूलिका[14], तस्या यत्संस्थानं तेन संस्थितौ तस्य द्वावपि बाहू भुजौ स्थूलावित्यर्थः ॥ तथा निसापाहाणे त्ति मुद्रा-

---

१ e inserts प्रलंबौ। २ a f फालाः। ३ a f दशनं। ४ a e f व। ५ a f °कुद्दा, e कुद्दाल त्ति। ६ e विशेषो। ७ a व। ८ e च। ९ e खड्डं, Marāṭhī खड्डा। १० e गर्त्ता रंध्राकारं। ११ e f साधर्म्येण। १२ a f om. १३ a e f कोट्टिका। १४ a e f कुस्थूलिका।

दिद्दलनःशिला, तत्संस्थितौ पृथुत्वमांसलत्वाभ्यां, द्वावपि अग्रहस्तौ भुजयोरग्रभूतौ करावित्यर्थः[१]। तथा निसालोढे[२] त्ति शिला-पुत्रकः, तत्संस्थानसंस्थिता हस्तयोरङ्गुल्यः स्थूलत्वदीर्घत्वाभ्याम् ॥ तथा सिप्पिपुडं ति शुक्तिसम्पुटस्यैकं दलं, तत्संस्थितास्तस्य नक्ख त्ति नखा हस्ताङ्गुलिसम्बन्धिनः ॥ वाचनान्तरे तु इदमपरमधीयते । अड-यालगसंठिओ[३] उरो तस्स रोमगुविलो[४] त्ति अत्र ऋडयालग[५] त्ति अट्टालकः प्राकारावयवः[६] सम्भाव्यते तत्साधर्म्यं चोरसः क्षामत्वादि-नेति ॥ तथा एहावियपसेवओ[७] व्व त्ति नापितप्रसेवक[८] इव नखशोधकक्षुरादिभाजनमिव, उरसि वक्षसि, लम्बेते[९] प्रलम्बमानौ तिष्ठतः[१०], द्वावपि तस्य स्तनकौ वक्षोजौ ॥ तथा पोट्टं जठरं, अयःकोष्ठकवल्लोहकुशूलवद्वृत्तं[११] वर्तुलम् ॥ तथा पानं धान्यरससंस्कृतं जलं येन कुविन्दाश्चीवराणि पाययन्ति तस्य कलन्दं कुण्डं पान-कलन्दं, तत्सदृशी गम्भीरतया से तस्य नाभिर्जठरमध्यावयवः ॥ वाचनान्तरेऽधीतं भग्गकडी विगयवंकपट्ठी[१२] असरिसा दो वि तस्स फिसगा । तत्र भग्नकटिर्विकृतवक्रपृष्ठः[१३], फिसकौ[१४] पुतौ ॥ तथा शिक्ककं[१५] दध्यादिभाजनानां दोरकमयमाकाशेऽ[१६]व-लम्बनं[१७] लोकप्रसिद्धं[१८], तत्संस्थानसंस्थितं से तस्य नेत्रं मथिदण्डा-

१ a f करौ इत्यर्थः। २ e निसालोढो। ३ e अडालग०। ४ e रोम विलो। ५ a e f अडयाल। ६ e प्रकारावयवः। ७ a f ०पसेवउ व त्ति, e ०पसेवउ त्ति। ८ e नापित तत्प्रसेवक। ९ e लंवि त्ति। १० a f तिष्ठतः। ११ a e f ०कोष्टक०। १२ e ०पिट्ठी (see Hem. I, 35, 129). १३ a f ०ष्ठष्ठः, e ष्ठष्ठिः। १४ Skr. properly स्फिचौ। १५ a f सिक्कवं, e सिक्ककं। १६ a e f दवरकमयम्। १७ a f अवलंबनं। १८ e लोके प्रसिद्धं।

कर्षणरज्जुः[१], तद्वद्दीर्घतया[२] तन्नेत्रं शेफ[३] उच्यते ॥ तथा किलपुडसंठाणसंठिय त्ति सुरागोणकरूपतण्डुलकिण्वभृतगोणीपुटद्वयसंस्थानसंस्थिताविति[४] सम्भाव्यते । द्वावपि तस्य वृषणौ पोत्रकौ ॥ तथा जमलकोट्ठिय त्ति समतया व्यवस्थापितकुशूलिकाद्वयसंस्थानसंस्थितौ[५] द्वावपि तस्य ऊरू[६] जङ्घे ॥ तथा अज्जुणगुट्ठं[७] व त्ति अर्जुनस्तृणविशेषस्तस्य गुट्ठं[८] स्तम्बस्तद्वत्तस्य[९] जानुनी । अनन्तरोक्तोपमानस्य[१०] साधर्म्यं व्यनक्ति । कुटिलकुटिले अतिवक्रे विकृतबीभत्सदर्शने ॥ तथा जङ्घे जानुनोरधोवर्तिन्यौ[११] । करकडीओ[१२] त्ति कठिने निर्मांसे इत्यर्थः । तथा रोमभिरुपचिते ॥ तथा अधरी पेषणशिला, तत्संस्थानसंस्थितौ द्वावपि तस्य पादौ ॥ तथा अधरीलोट्टः शिलापुत्रकः, तत्संस्थानसंस्थिताः पादयोरङ्गुल्यः ॥ तथा[१३] शुक्तिपुटसंस्थिताः से तस्य पादाङ्गुलिनखाः ॥

॥ ९५ ॥ केशाग्रान्नखाग्रं यावद्वर्णितं पिशाचरूपमधुना सामान्येन तद्वर्णनायाह । लडहमडहजाणुए[१४] त्ति इहप्रस्तावे लडहशब्देन गन्त्र्याः पश्चाद्भागवर्ति तदुत्तराङ्गरक्षणार्थं[१५] यत्काष्ठं[१६] तदुच्यते, तच्च गन्त्र्यां श्लथबन्धनं भवति, एवं च श्लथसन्धिबन्धनत्वाल्लडह[१७] इव, लडहे मडहे च स्थूलत्वाल्पदीर्घत्वाभ्यां जानुनी यस्य तत्तथा ॥ विकृते

---

१ e मिथि० । २ a f सद्द्वयद्दीर्घतया । ३ a f सेफा । ४ a ०तंडुलं; a f विद्व० । ५ a f अवस्थापित० । ६ a f ऊरुजंघे, e उरु जंघे । ७ a f उज्जुण० ; a f ०गुंटं, e ०गुच्छं । ८ a f गुंडं, e गुच्छं । ९ e स्तवकः । १० e ०पमानसाधर्म्यं । ११ e जान्वोरधो० । १२ a e f करकडीउ त्ति । १३ a e f om. १४ a f ०जाण्णुए । १५ a f तदुत्तंगनरक्षणार्थं, e सदुत्तंगरक्षणार्थं । १६ a f यत्काष्ठं । १७ e श्लथसंबंधधनत्वाल्लडह ।

विकारवत्यौ, भग्ने[1] विसंष्ठुलतया[2], भुग्ने[3] वक्रे भ्रुवौ यस्य पिशाचरूपस्य तत्तथा॥ इहान्यदपि विशेषणचतुष्टयं वाचनान्तरे[4]ऽधीयते। मसि-मूसगमहिसकालए[5] मषीमूषिकामहिषवत्कालकम्। भरियमेहवण्णे[6] जलभृतमेघवर्णं कालमेवेत्यर्थः। लम्बोट्ठे निग्गयदन्ते प्रतीत-मेव[7] तथा॥ **अवदारितं** विवृतीकृतं वदनलक्षणं विवरं येन तत्तथा। तथा निर्लालिता निष्कासिता[8] अग्रजिह्वा जिह्वाया अग्रभागो येन तत्तथा। ततः कर्मधारयः॥ तथा **शरटैः**[10] कृकलासैः कृता[11] मालिका स्रक् मुण्डे वक्षसि वा येन तत्तथा॥ तथा[12] उन्दुरमा-लया[13] मूषिकस्रजा[14] परिणद्धं परिगतं सुकृतं सुष्ठु[15] रचितं चिह्नं स्वकीयलाञ्छनं येन तत्तथा॥ तथा **नकुलाभ्यां** बभ्रुभ्यां कृते कर्णपूरे आभरणविशेषौ येन तत्तथा॥ तथा[16] **सर्पाभ्यां** कृतं वैकक्ष-मुत्तरासङ्गो येन तत्तथा[17]॥ पाठान्तरेण मूसगकयचुंभलए[18] विच्छुय-कयच्छे[19] सप्पकयजन्नोवइए[20], तत्र चुंभलए त्ति[21] शेखरः[22], विच्छुय त्ति वृश्चिकाः, यज्ञोपवीतं ब्राह्मणकण्ठसूत्रम्। तथा अभिन्नमुह-नयणनक्खवरवग्घचित्तकत्तिनियंसणे[23] अभिन्नाः अविशीर्णा मुखनयन-

---

१ e भुग्ने। २ a f विसंस्थुलतया, e विसंस्थलंतया। ३ e मुग्ने। ४ a f ॰तरे अधीयते, e ॰तरे तु अधीयते। ५ a f यत्काष्टं। ६ e ॰मूसंग॰ (see Hem. I, 88); e ॰माहिस॰। ७ a f ॰मेहे वन्ने, e ॰मेहवन्ने। ८ e प्रतीतं तत्तथा। ९ a f निःकाशिता। १० a f सरटैः। ११ a कृता मालिका स्रक् मुंडे वा वक्षसि वा, e कृतमालिस्रग्मुंडे वक्षसि वा। १२ e om. १३ e उंदर॰, a f ॰माला। १४ e मूषक॰। १५ a e f सुष्टु। १६ e om. १७ e om. तत्। १८ a f ॰भंभलए, e ॰भूंभलए, but see afterwards; the Marāṭhī has चुंभल or चुंबल। १९ e विच्छुयच्छे। २० a e f ॰जन्नोवइए। २१ a f चंभलउ त्ति, e भंभुलउ त्ति। २२ a e f शेषरः। २३ e ॰कित्ति (see Nām. 110).

नखा यस्यां सा तथा, सा चासौ वरव्याघ्रस्य चित्रा कर्बुरा कृत्तिश्च चर्मेति कर्मधारयः, सा निवसनं परिधानं यस्य तत्तथा। सरस-रुहिरमंसावलित्तगत्ते सरसाभ्यां रुधिरमांसाभ्यामवलिप्तं गात्रं यस्य तत्तथा॥ आस्फोटयन् करास्फोटं कुर्वन्। अभिगर्जन् घनध्वनिं मुञ्चन्। भीमो मुक्तः कृतो ऽट्टहासो हासविशेषो येन तत्तथा॥ नानाविधपञ्चवर्णैरोमभिरुपचित[1] एकं महन्नीलोत्पलगवलगुलि-कातसीकुसुमप्रकाशमसिं क्षुरधारं गृहीत्वा, यत्र पोषधशाला[2] यत्र कामदेवः श्रमणोपासकस्तत्रोपागच्छतिस्मेति। इह गवलं महिष-शृङ्गं, गुलिका नीली, अतसी धान्यविशेषः, असिः[3] खड्गः, क्षुरस्येव धारा यस्यातिच्छेदकत्वादसौ क्षुरधारः॥ आसुरुत्ते रुट्ठे कुविए चण्डिक्किए मिसिमिसीयमाणे[4] त्ति एकार्थाः शब्दाः कोपातिशय-प्रदर्शनार्थाः॥ अप्पत्थियपत्थिया अप्रार्थितप्रार्थिक[5]॥ दुरन्तानि दुष्टपर्यवसानानि प्रान्तान्यसुन्दराणि लक्षणानि यस्य स तथा॥ हीणपुण्णचाउद्दसिय[6] त्ति हीना असम्पूर्णा पुण्या चतुर्दशी तिथि-र्जन्मकाले यस्य स हीनपुण्यचतुर्दशीकः, तदामन्त्रणं श्रीह्री-धृतिकीर्त्तिवर्जितेति व्यक्तम्॥ तथा धर्मं श्रुतचारित्रलक्षणं काम-यते ऽभिलाषयति यः स धर्मकामः, तस्यामन्त्रणं हे धम्मकामया। एवं सर्वपदानि। नवरं पुण्यं शुभप्रकृतिरूपं कर्म, स्वर्गस्तत्फलं, मोक्षो धर्मफलं, काङ्क्षा अभिलाषातिरेकः[7], पिपासा काङ्क्षाति-

१ a उपचितं एकं. e उपचितमेकं। २ e पोषधशालायां। ३ e असिं खड्गं। ४ a f मिसिमिसेमाणे। ५ a f ०प्रार्थक, e ०प्रार्थिकः। ६ a f ०चाउद्दसि त्ति, e ०चाउद्दस त्ति। ७ e ०अतिरेकाः।

रेकः[१] । एवमेतैः पदैरुत्तरोत्तरो[२]ऽभिलाषप्रकर्ष एवोक्तः ॥ नो खलु इत्यादि न खलु नैव कल्पन्ते शीलादीनि चलयितुमिति वस्तुस्थितिः[३]। केवलं यदि त्वं तान्यद्य न चलयसि, ततोऽहं त्वां खण्डाखण्डिं करोमीति वाक्यार्थः ॥ तत्र शीलान्यणुव्रतानि, व्रतानि दिग्व्रतादीनि, विरमणानि रागादिविरतयः, प्रत्याख्यानानि नमस्कारसहितादीनि, पोषधोपवासान् आहारादिभेदेन चतुर्विधान् । चालित्तए भङ्गकान्तरकरणतः, क्षोभयितुं एतत्पालनविषयं क्षोभं कर्तुं, खण्डयितुं देशतो, भङ्क्तुं सर्वतः[४], उज्झितुं सर्वस्या[५] देशविरतेस्त्यागतः, परित्यक्तुं सम्यक्त्वस्यापि त्यागादिति ॥ अट्टदुहट्टवसट्टे त्ति आर्तस्य ध्यानविशेषस्य यो दुहट्ट त्ति दुर्घटो दुःस्थागो[६] दुर्निरोधो वशः पारतन्त्र्यं तेन ऋतः पीडितः आर्तदुर्घटवशार्तः । अथवा आर्तेन दुःखार्तः आर्तदुःखार्तः, तथा वशेन[७] विषयपारतन्त्र्येण ऋतः परिगतो वशार्तः, ततः कर्मधारय इति ॥

॥ ८६ ॥ अभीते[८] इत्यादीन्येकार्थान्यभयप्रकर्षप्रदर्शनार्थानि[९] ॥

॥ ८८ ॥ तिवलियं ति त्रिवलीकां भ्रूकुटिं[१०] दृष्टिरचनाविशेषम् ॥ ललाटे संहृत्य विधायेति ॥

---

१ e ॰अतिरेकाः । २ e उत्तरोत्तराभिलाष॰ । ३ Instead of वस्तुस्थितिः e reads मेयितुं देशतो भंक्तुं सर्वतः, which has probably wrongly crept in here from the subsequent part of the comm. ४ a f सर्वतः । उज्झितुं; but e सर्वत उज्झितुं, evidently, though wrongly, constructing सर्वतः with the preceding clause. ५ e सर्वस्य । ६ e दुस्थगो । ७ e adds च । ८ a f अभीत । ९ e अतिभय for अभय । १० a f भ्रुकुटिं, e भृकुटीं ।

॥१०१॥ चलयितुमन्यथा[1] कर्तुम्। चलनं च द्विधा संशयद्वारेण विपर्ययद्वारेण च। तत्र क्षोभयितुमिति संशयतो, विपरिणमयितुमिति[2] च विपर्ययतः॥ श्रान्तादयः समानार्थाः॥ सप्ताङ्गप्रतिष्ठितं सप्ताङ्गानि चत्वारः पादाः करः पुच्छं शिश्नं[3] चेति, एतानि प्रतिष्ठितानि[4] भूमौ लग्नानि यस्य तत्तथा॥ समं[5] मांसोपचयात्संस्थितम्॥ गजलक्षणोपेतसकलाङ्गोपाङ्गत्वात्सुजातमिव। सुजातं पूर्णदिनजातम्॥ पुरतोऽग्रत[6] उदग्रं उच्चं समुच्छ्रितशिर इत्यर्थः॥ पृष्ठतः[7] पृष्ठदेशे[8] वराहः शूकरः, स इव वराहः। प्राकृतत्वान्नपुंसकलिङ्गता॥ अजाया इव कुक्षिर्यस्य[9] तदजाकुक्षि॥ अलम्बकुक्षि[10] बलवत्त्वेन[11]॥ प्रलम्बो दीर्घो, लम्बोदरस्येव गणपतेरिव, अधरः[12] ओष्ठः, करश्च हस्तो यस्य तत्प्रलम्बलम्बोदराधरकरम्॥ अभ्युद्गतमुकुला आयातकुड्मला या[13] मल्लिका विचकिलस्तद्वत्, विमलधवलौ[14] दन्तौ। अत्र[15] वा प्राकृतत्वान्मल्लिकामुकुलवदभ्युद्गतावुन्नतौ विमलधवलौ[16] च दन्तौ यस्य तदभ्युद्गतमुकुलमल्लिकाविमलधवलदन्तम्॥ काञ्चनकोशीप्रविष्टदन्तं, [17] कोशी[18] प्रतिमा॥ आनामितमीषन्नामितं यच्चापं धनुस्तद्वद्या ललिता च विलासवती, संवेल्लिता च वेल्लन्ती सङ्कोचिता वा, अग्रशुण्डा शुण्डाग्रं यस्य तत्तथा॥ कूर्मवत्कूर्माकाराः प्रतिपूर्णाश्चरणा यस्य तत्तथा॥ विंशतिनखम्॥ आलीनप्रमाणयुक्तपुच्छमिति कण्ठ्यम्॥

---

१ e चालयितुम्। २ e विपरिणामयितुम्। ३ a f सिन्नं, e सिस्न। ४ a f प्रतिष्ठितानि। ५ a e f समं। ६ a f पुरंतो। ७ a f पृष्टतः। ८ a f पृष्टिदेशे। ९ a e f कुक्षौ यस्य। १० e अलंवकुक्षौ। ११ e प्रलंवत्वेना। १२ e अधरौष्टः। १३ e वो। १४ e विमलोधवलौ। १५ e अथवा for अत्र वा। १६ a e विमलधवलदन्तौ। १७ e ॰प्रतिष्ठ॰। १८ e कोशीति।

॥१०७॥ उग्गविसं इत्यादीनि सर्परूपविशेषणानि क्वचिद्या-वच्छब्दोपात्तानि, क्वचित्साचादुक्तानि[१] दृश्यन्ते॥ तत्र उग्रविषं दुरधिसह्यविषम्। चण्डविषं अल्पकालेनैव दष्टशरीरव्यापकविषत्वात्। घोरविषं मारकत्वात्। महाकायं महाशरीरम्। मषीमूषाकालकम्। नयनविषेण दृष्टिविषेण रोषेण च पूर्णं नयनविषरोषपूर्णम्। अञ्जन-पुञ्जानां कज्जलोत्करणानां यो निकरः समूहस्तद्वत्प्रकाशो यस्य तदञ्जनपुञ्जनिकरप्रकाशम्। रक्ताचं लोहितलोचनम्। यमलयोः समस्थयोर्युगलं द्वयं चञ्चलं[२] चलन्त्योरत्यर्थं चपलयोर्जिह्वयोर्यस्य तद्यमलयुगलचञ्चलजिह्वम्। धरणीतलस्य वेणीव केशबन्धविशेष इव कृष्णत्वदीर्घत्वाभ्यामिति धरणीतलवेणिभूतम्। उत्कटो ऽनभिभव-नीयत्वात्, स्फुटो व्यक्तो भासुरतया दृश्यत्वात्, कुटिलो वक्रत्वात्, जटिलः केशसटायोगात्, कर्कशो निष्ठुरो[३] नम्रताया अभावात्, विकटो विस्तीर्णो यः स्फुटाटोपः फणाडम्बरं तत्करणे दक्षं उत्कट-स्फुटकुटिलजटिलकर्कशविकटस्फुटाटोपकरणदक्षम्॥

॥१०८॥ तथा लोहागरधम्ममाणधमधमेन्तघोसं[४] लोहाकरस्येव ध्मायमानस्य भस्त्राका[५] तेनोद्दीप्यमानस्य धमधमायमानस्य धम-धमेत्येवं शब्दायमानस्य घोषः शब्दो यस्य तत्तथा। इह च विशेष्यस्य[६] पूर्वनिपातः प्राकृतत्वादिति॥ अणागलियतिव्वपयण्डरोसं अनाकलितो ऽपरिमितो[७] ऽनर्गलितो वा निरोद्धुमशक्यस्तीव्रः प्रचण्डो ऽतिप्रकृष्टो रोषो यस्य तत्तथा॥ सरसरस्स त्ति लौकिकानुकरणभाषा॥ पच्छि-

---

१ a f om. क्वचित्साचादुक्तानि। २ e f चंचलंत्योः। ३ a f निष्ठुरी। ४ a f ०धमधमधमेंत०। ५ a f भस्त्रावा, e भस्रावा। ६ e विशेषणस्य। ७ f अप्रमितो।

सेणं भाएणं[१] ति पुच्छेनेत्यर्थः॥ निकुट्टेमि त्ति निकुट्टयामि प्रहण्मि॥

॥ १११ ॥ उज्जलं ति उज्ज्वलां विपक्षलेशेनाप्यकलङ्किताम्। त्रिपुलां शरीरव्यापकत्वात्। कर्कशां कर्कशद्रव्यमिवानिष्टाम्। प्रगाढां प्रकर्षवतीम्। चण्डां रौद्राम्। दुःखां[२] दुःखरूपां, न सुखामित्यर्थः। किमुक्तं भवति, दुरहियासं ति दुरधिसह्यामिति॥

॥ ११२ ॥ हारविराइयवच्छमित्यादौ[३] यावत्करणादिदं दृश्यम्[४]। कडगतुडियथम्भियभुयं[५] अङ्गदकुण्डलमट्ठगण्डतलकण्णपीढधारिं [विचित्तहत्थाभरणं[६]] विचित्तमालामउलिं कल्लाणगपवरवत्थपरिहियं [कल्लाणगपवरमल्लाणुलेवणधरं[७]] भासुरबोन्दिं[८] पलम्बवणमालाधरं दिव्वेणं वण्णेणं दिव्वेणं गन्धेणं दिव्वेणं फासेणं दिव्वेणं सङ्घयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्डीए दिव्वाए जुईए दिव्वाए पभाए[९] दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए त्ति कण्ठ्यम्। नवरं कटकानि कङ्कणविशेषास्तुटितानि बाहुरक्षकास्ताभिरतिबहुत्वात्स्तम्भितौ[१०] स्तब्धीकृतौ भुजौ यस्य तत्तथा। अङ्गदे च केयूरे, कुण्डले च प्रतीते[११], मृष्टगण्डतले घृष्टगण्डे[१२] ये कर्णपीठाभिधाने कर्णाभरणे ते च धारयति यत्तत्तथा। तथा[१३]

---

१ a f भागेणं। २ e दुक्ख। ३ a e •वत्थम्। ४ Compare Ov. § 33 on this passage. ५ a f •भजं। ६ Probably an interpolation, as it is omited in the following interpretation. ७ Possibly an interpolation, as it is omitted in the version of the interpretation given by MS. f, see below, note २ on pg. ४२। ८ a f भासरबोंदिं। ९ e पहाए। १० a f •रचिकाः। ११ e प्रतीत्तौ। १२ e reads घृष्टगण्डापक कर्ण•। १३ e तच।

विचित्रमालाप्रधानो मौलिर्मुकुटं मस्तकं वा यस्य तत्तथा। कल्याण-कमनुपहतं[1] प्रवरं वस्त्रं परिहितं येन तत्तथा। [[2]कल्याणकानि प्रवराणि माल्यानि कुसुमानि अनुलेपनानि च धारयति यत्तत्तथा]। भास्वरबोन्दीकं[3] दीप्तशरीरम्। प्रलम्बा या वनमाला आभरण-विशेषस्तां धारयति यत्तत्तथा। दिव्येन वर्णेन युक्तमिति गम्यते। एवं सर्वत्र, नवरं ऋध्या विमानवस्त्रभूषणादिकया। युत्या इष्ट-परिवारादियोगेन। प्रभया प्रभावेन। छायया प्रतिबिम्बेन। अर्चिषा दीप्तिज्वालया। तेजसा कान्त्या। लेश्यया आत्मपरिणामेन॥ उद्योतयत्प्रकाशयच्छोभयदिति॥ प्रासादीयं चित्ताह्लादकं, दर्शनीयं यत्पश्यच्चक्षुर्न श्राम्यति, अभिरूपं मनोज्ञं, प्रतिरूपं दृष्टारं २ प्रति रूपं यस्य॥

॥११३॥ विकुर्व्य वैक्रियं कृत्वा॥ अन्तरिक्षप्रतिपन्न आकाश-स्थितः॥ सकिङ्किणीकानि क्षुद्रघण्टिकोपेतानि॥ सक्के देविन्दे इत्यादौ यावत्करणादिदं दृश्यम्[4]। वज्जपाणी पुरन्दरे सयक्कऊ सहस्सक्खे मघवं पागसासणे दाहिणड्ढलोगाहिवई बत्तीसविमाणसयसहस्सा-हिवई एरावणवाहणे सुरिन्दे[5] अरयम्बरवत्थधरे[6] आलइयमालम-उडे नवहेमचारुचित्तचञ्चलकुण्डलविलिहिज्जमाणगण्डे भासुरबोन्दी[7] पलम्बवणमाले[8] सोहम्मे कप्पे सोहम्मवडिंसए[9] विमाणे सभाए सोहम्माए त्ति शक्रादिशब्दानां च व्युत्पत्त्यर्थभेदेन भिन्नार्थता द्रष्ट-

---

१ a f अनुपहतं। २ f omits this passage entirely. ३ a ०बोदीकं। ४ Compare Kap. § 14. ५ a f सुरेन्दे। ६ e अयरम्ब० ७ a f भासरबोंदी। ८ e ०मालधरे। ९ a f ०वडेंसए।

था। तथाहि। शक्तियोगाच्छक्रः। देवानां परमैश्वरत्वाद्देवेन्द्रः। देवानां मध्ये राजमानत्वाच्छोभमानत्वाद्देवराजः[१]। वज्रपाणिः कुलिशकरः। पुरोऽसुरादिनगरविशेषस्तस्य दारणात्पुरन्दरः। तथा क्रतुशब्देनेह[२] प्रतिमा विवक्षितास्ततः कार्त्तिकश्रेष्ठित्वे शतं क्रतूनामभिग्रहविशेषाणां यस्यासौ शतक्रतुरिति चूर्णिकारव्याख्या। तथा पञ्चानां मन्त्रिशतानां सहस्रमक्ष्णां भवतीति तद्योगादसौ सहस्राक्षः। तथा मघशब्देनेह मेघा विवक्षितास्ते यस्य वशवर्त्तिनः सन्ति स मघवान्। तथा पाको नाम बलवांस्तस्य रिपुस्तच्छासनात्पाकशासनः। लोकस्यार्द्धमर्द्धलोको, दक्षिणो योऽर्द्धलोकः, तस्य[३] योऽधिपतिः स तथा। एरावणः ऐरावतो[४] हस्ती, स वाहनं यस्य स तथा। सुष्ठु[५] राजन्ते ये[६] ते सुरास्तेषामिन्द्रः प्रभुः सुरेन्द्रः, सुराणां देवीनां वा इन्द्रः सुरेन्द्रः। पूर्वत्र देवेन्द्रत्वेन प्रतिपादितत्वादन्यथा वा पुनरुक्तपरिहारः कार्यः। अरजांसि निर्मलानि, अम्बरमाकाशं, तद्वदच्छत्वेन यानि तान्यम्बराणि तानि वस्त्राणि, तानि[७] धारयति यः स तथा। आलिङ्गितमालमारोपितस्रग्मुकुटं[८] यस्य स तथा। नवे इव नवे[९] हेम्नः सुवर्णस्य सम्बन्धिनौ चारुणी शोभने चित्रे चित्रवती चञ्चले ये कुण्डले[१०] ताभ्यां विलिख्यमानौ गण्डौ यस्य स तथा। शेषं प्रागिवेति ॥ सामाणियसाहस्सीणमिह[११] यावत्करणादिदं दृश्यम्। तायत्तीसाए[१२] तायत्तीसगाणं[१२] चउण्हं लोगपालाणं अट्ठण्हं अग्ग-

१ a f राजानाच्छो॰। २ e शतक्रतु॰। ३ e om. ४ e एरावणः। ५ a e f सुष्ठु। ६ e ण्ते for ये ते। ७ e om. ८ e मुकुटो। ९ e नव। १० a f कुंडलो। ११ Compare Kap. § 14. १२ a l तावत्तीस॰।

महिसीणं सपरिवाराणं तिण्हं परिमाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं चउण्हं चउरासीणं[१] आयरक्खदेवसाहस्सीणं[२] ति।[३] तत्र त्रायस्त्रिंशाः पूज्या महत्तरकल्पाः। लोकपालाः पूर्वादिदिगधिपतयः सोमयमवरुणवैश्रवणाख्याः[४]। अग्रमहिष्यः प्रधानभार्याः, तत्परिवारः प्रत्येकं पञ्चसहस्राणि, सर्वमीलने[५] चत्वारिंशत्सहस्राणि। तिस्रः परिषदोऽभ्यन्तरा मध्यमा बाह्या च। सप्तानीकानि पदातिगजाश्वरथवृषभभेदात्पञ्चसाङ्ग्रामिकाणि गन्धर्वानीकं नाट्यानीकं चेति सप्त। अनीकाधिपतयश्च सप्तैवं, प्रधानः पत्तिः प्रधानो गज एवमन्येऽपि॥ आत्मरक्षा[६] अङ्गरक्षास्तेषां चतस्रः सहस्राणां चतुरशीत्यः॥ आख्याति सामान्यतो, भाषते विशेषतः, एतदेव प्रज्ञापयति प्ररूपयतीति पदद्वयेन क्रमेणोच्यत इति॥ देवेण वेत्यादौ यावत्करणादेवं द्रष्टव्यम्। जक्खेण वा रक्खसेण वा किन्नरेण वा किम्पुरिसेण[७] वा महोरगेण वा गन्धव्वेण वा इति॥ इड्ढी इत्यादि यावत्करणादिदं दृश्यम्। जुई जसो बलं वीरियं पुरिसक्कारपरक्कमे त्ति॥ नाई[८] भुज्जो करणयाए, न[९] नैव, आई[१०] ति निपातो वाक्यालङ्कारे ऽवधारणे वा, भूयः करणतायां पुनराचरणे न प्रवर्त्तिष्ये इति गम्यते॥

॥ ११६॥ जहा सङ्खो त्ति यथा सङ्खः श्रावको भगवत्याभिहितस्तथायमपि वक्तव्यः। अयमभिप्रायः[११]। अन्ये, पञ्चविधमभिगमं

---

१ Kap. § 14 has चउरासिईए as well as var. lec. चउरासीणं। २ e ०साहस्सीएणं। ३ e om. ४ e वैश्रमणा०। ५ a f om. पञ्च० सर्व०। ६ e आत्मरक्षार्थमङ्गरक्षाः। ७ e किंपुरुसेण। ८ e नायं। ९ e om. १० e आयं। ११ a e f ०प्रायोऽन्ये।

सचित्तद्रव्यव्युत्सर्गादिकं समवसरणप्रवेशे विदधति शङ्खः, पुनः पोषधिकत्वेन[1] सचेतनादिद्रव्याणामभावात्तन्न कृतवानयमपि[2] पोषधिक[3] इति शङ्खेनोपमितः ॥ यावत्करणादिदं द्रष्टव्यम् । जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ, २त्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणं पयाहिणं करेइ, २त्ता वन्दइ नमंसइ, २त्ता[4] नच्चासन्ने नाइदूरे सुस्सूसमाणे[5] नमंसमाणे[6] अभिमुहे पञ्जलिउडे[7] पज्जुवासइ त्ति ॥

॥११७॥ तए णं समणे ३ कामदेवस्स समणोवासयस्स तीसे य[8] इत आरभ्य औपपातिकाधीतं[9] सूत्रं तावद्वक्तव्यं यावद्धर्मकथा समाप्ता परिसच्च[10] प्रतिगता । तच्चैवं सविशेषमुपदर्श्यते[11] । तए णं समणे भगवं महावीरे कामदेवस्स समणोवासयस्स तीसे य महइमहालीयाए,[12] तस्याश्च महतिमहत्या[13] इत्यर्थः । इसिपरिसाए मुणिपरिसाए जइपरिसाए, तत्र पश्यन्तीति ऋषयो ऽवध्यादिज्ञानवन्तः, मुनयो वाचंयमाः, यतयो धर्मक्रियासु प्रयतमानाः अणेगसयाए अणेगसयवन्दपरिवाराए,[14] अनेकशतप्रमाणानि यानि वृन्दानि तानि[15] परिवारो यस्याः सा[15] तथा । तस्या धर्मं परिकथयतीति सम्बन्धः । किम्भूतो भगवान्, ओहबले अइबले[16] महब्बले, ओघबलोऽव्यव-

---

१ a f पौषधिक॰, e पौषधक॰ । २ a f ॰भावार्त्तनकृतवान् । ३ a f पौषधिक । ४ a f एवं २ for २त्ता । ५ e सुस्सूसमाणे । ६ e om. ७ a f पंजलियडे । ८ After this, e adds महइमहालीयाए परिसाए । ९ See Ov. § 56. १० a e only परिसत् । ११ e सकलशेषम् । १२ a f ॰महालयाए । १३ e महान्नी॰ । १४ a f ॰चन्द्र॰ for ॰वन्द॰ । १५ e om. १६ The reading of e is confused ओहबले ओघबले यावत्करणादव्यवच्छिन्नबलः ।

च्छिन्नबल:, अतिबलो ऽतिक्रान्ता:[१] शेषपुरुषा:, मरन्ति तिर्यग्बल:, महाबलो ऽप्रमितबल:। एतदेव प्रपञ्चयते। [२]अपरिमियबलविरियते-यमाहप्पकंतिजुत्ते, [अपरिमितानि[३] यानि बलादीनि तैर्युक्तो यः स तथा, तत्र] बलं शारीर: प्राण:, वीर्यं जीवप्रभव:, तेजो दीप्ति:, माहात्म्यं महानुभावता, कान्ति: काम्यता। सारयनवठणियमहु-रनिग्घोसदुन्दुभिसरे[४] शरत्कालप्रभवाभिनवमेघशब्दवन्मधुरो निर्घोषो यस्य दुन्दुभेरिव च[५] स्वरो यस्य स तथा। उरे वित्थडाए[६] सरस्सत्येति सम्बन्ध:। कण्ठे[७] पवट्टियाए[८] [गलविवरस्य[३] वर्तुलत्वात्। सिरे सङ्कि-ण्णाए मूर्धनि सङ्कीर्णया आयामस्य मूर्ध्ना स्खलितत्वात्], अगरलाए[९] व्यक्तवर्णयेत्यर्थ:[१०], अमम्मणाए[११] अनवरवच्यमानयेत्यर्थ:[१२]। सव्वक्खर-सन्निवाइयाए[१३] सर्वाक्षरसंयोगवत्या। पुण्णरत्ताए परिपूर्णमधुरया। सव्वभासाणुगामिणीए सरस्सईए भणित्य। जोयणनीहारिणा सरेणं योजनातिक्रामिणा शब्देन॥ अद्धमागहाए भासाए भासइ अरहा धम्मं परिकहेइ। अर्धमागधी भाषा यस्यां रसोर्लशौ मागध्यामि-त्यादिकं मागधभाषालक्षणं[१४] परिपूर्णं नास्ति। भाषते सामान्येन

---

१ a e f अतिकांता (e अतिक्रांता) शेषपुरुषा मरति (f सरति) तिर्यग्बलः। २ From here the text of a e f is exceedingly confused and incorrect; I have restored it, as well as possible, according to the text of Ov. § 56. ३ The portion in brackets in omitted is a and f. ४ e °घण-णिन्नायर°, f °वणिय° for °ठणिय°। ५ e om. च। ६ After this e inserts wrongly the portion गलविवरस्य etc. in brackets. ७ a f कंठ, e कंट। ८ e पीवट्टीयाए (Skr. प्रवेष्टित)। ९ a f खागरलाए, e अगरभाए। १० e व्यक्त-वर्णघोसेत्यर्थः। ११ a e f अम्ममणाए। १२ e अनवरवंचमान°, f अनवरवंच्यमा-न°। १३ a e f °सन्निवायाए। १४ e मागधी° (See Hem. IV, 288)।

भणन्ति[1] । किंविधो भगवान्, अर्हन् पूजितो[2] पूजोचितः[3], अरहस्यो वा सर्वज्ञत्वात् । कं धम्मं अद्धेयज्ञेयानुष्ठेयवस्तु[4] श्रद्धानज्ञानानुष्ठानरूपम्[4] । तथा परिकथयति अशेषविशेषं कथनेनेति । तथा तेसिं सव्वेसिं आरियमणारियाणं[5] अगिलाए धम्ममाइक्खइ । न केवलं ऋषिपर्षदादीनां ये वन्दनाद्यर्थमागतास्तेषां च सर्वेषामार्याणामार्यदेशोत्पन्नानामनार्याणां म्लेच्छानामग्लान्या अखेदेनेति ॥ सा वि य णं अद्धमागहा भासा तेसिं आरियमणारियाणं[5] अप्पणो भासाए परिणामेणं परिणमइ[6] । स्वभाषापरिणामेनेत्यर्थः[7] । धर्मकथामेव दर्शयति ॥ अत्थि लोए अत्थि अलोए, एवं जीवा अजीवा, बन्धे मोक्खे, पुण्णे पावे, आसवे संवरे, वेयणा[8] निज्जरा[9] । एतेषामस्तित्वदर्शनेन शून्यज्ञाननिरात्माद्वैतैकान्तक्षणिकनित्यवादिनास्तिकादिकुदर्शननिराकरणात् परिणामिवस्तुप्रतिपादनेन[10] सकलैहिकामुष्मिकक्रियाणामनवद्यत्वमावेदितम् ॥ तथा अत्थि अरहन्ता[11] चक्कवट्टी, बलदेवा वासुदेवा, नरगा[12] नेरइया, तिरिक्खजोणिया तिरिक्खजोणिणीओ, मायापिया रिसओ, देवा देवलोया, सिद्धी सिद्धा, परिणिव्वाणे[13] परिणिव्वुया[14] । सिद्धिः[15] कृतकृत्यता, परिनिर्वाणं सकलकर्मकृतविकारविरहादतिस्वास्थ्यमेव, सिद्धपरिनिर्वृतानामपि

---

१ e भणनमिति । २ a f पजितपूजो॰ । ३ a पूजोवितः । ४ a f नुष्ठय॰, ॰नुष्ठान॰ । ५ e आयरियमणायरियाणं । ६ f om. ७ f om स्वभाषा । ८ a e f om., supplied from Ov. § 56. ९ e निज्जरे । १० e परिणामवस्तु॰ । ११ e अरिहंता । १२ a f नरका, e om. १३ a e f परिनिव्वाणे । १४ e परिनिव्वया । १५ e सिद्दा ।

विशेषो ऽवसेयः॥ तथा अत्थि पाणाइवाए मुसावाए अदिसादाणे[१] मेहुणे परिग्गहे, अत्थि[२] कोहे[३] माणे[३] माया लोभे पेज्जे[४] दोसे कलहे अब्भक्खाणे अरइरई पेसुन्ने परपरिवाए मायामोसे[५] मिच्छा-दंसणसल्ले, अत्थि पाणाइवायवेरमणे जाव[६] कोहविवेगे जाव मिच्छा-दंसणसल्लविवेगे। किं बहुना[७]। सव्वं अत्थिभावं अत्थि त्ति वयइ, सव्वं नत्थिभावं नत्थि त्ति वयइ। सुचिण्णा कम्मा सुचिण्णफला भवन्ति, सुचरिताः क्रियादानादिकाः सुचीर्णफलाः पुण्यफला भवन्तीत्यर्थः। दुच्चिण्णा[८] कम्मा दुच्चिण्णफला[८] भवन्ति। फुसइ पुण्णपावे, बध्नात्यात्मा शुभाशुभकर्मणी न पुनः साङ्ख्यमतेनैव न बध्यते। पच्चायन्ति जीवा, प्रत्यायन्ते[९] उत्पद्यन्ते इत्यर्थः। सफले कल्लाणपावए, इष्टानिष्ट-फलं शुभाशुभं कर्मेत्यर्थः॥ धम्ममाइक्खइ, अनन्तरोक्तं ज्ञेयश्रद्धे-यज्ञानश्रद्धानरूपमाचष्टे[१०] इत्यर्थः॥ तथा इणमेव[११] निग्गन्थे पावयणे सच्चे, इदमेव प्रत्यक्षं नैर्ग्रन्थं प्रवचनं जिनशासनं सत्यं सद्भूतं कषायादिशुद्धत्वात्सुवर्णवत्[१२]। अणुत्तरे अविद्यमानप्रधानतरम्[१३]। केवलिए अद्वितीयम्। संसुद्धे[१४] निर्दोषम्। पडिपुण्णे सद्गुणभृतम्। नेयाउए नैयायिकं न्यायनिष्टम्। सल्लगत्तणे[१५] मायादिशल्यकर्त्तनम्। सिद्धिमग्गे[१६] हितप्राप्तिपथः। मुत्तिमग्गे अहितविच्युतेरुपायः[१७]।

---

१ a f अदत्तादाणे, e अदिन्नादाणे। २ f om. ३ a f om. ४ e पिज्जे। ५ a f om. ६ a e f om., but required by Ov. § 56. ७ e बहुणा, as if it were part of the Prākrit quotation. ८ a f दुचिन्न॰। ९ a f प्रत्याजायते। १० e om. ॰श्रद्धान॰। ११ a f इणामेव। १२ a f कषादि॰। १३ e ॰माणं प्रधान॰। १४ a e f संशुद्धे। १५ a f सत्तगत्तणे। १६ e सिद्धमग्गे। १७ e ॰विच्युतेर्।

निव्वाणमग्गे[1] सिद्धिक्षेत्रावाप्तिपथः। परिनिव्वाणमग्गे कर्माभावप्रभवसुखोपायः[1]। सव्वदुक्खप्पहीणमग्गे, सकलदुःखक्षयोपायः, इदमेव प्रवचनं फलतः प्ररूपयति ॥ इत्थं[2] ठिया जीवा सिज्झन्ति, निष्ठितार्थतया, बुज्झन्ति केवलितया[3], मुच्चन्ति कर्मभिः, परिणिव्वायन्ति[4] स्वस्थीभवन्ति। किमुक्तं भवति[5]। सव्वदुक्खाणमन्तं करेन्ति[6]। एगच्चा पुण एगे[7] भयन्तारो, एकार्चा अद्वितीयपूज्याः[8] संयमानुष्ठाने[9] वा अर्चा दृशी अर्चा शरीरं येषं ते एकार्चाः, ते पुनरेकैकेन[10] वायेन सिध्यन्ति, ते भक्तारो निग्रन्थप्रवचनसेवका भदन्ता वा भट्टारका भयत्रातारो वा॥ पुव्वकम्मावसेसेणं अन्नतरेसु देवलोगेसु देवत्ताए उववत्तारो भवन्ति महिड्ढिएसु महज्जुइएसु[11] महाजसेसु महाबलेसु महाणुभावेसु महासुक्खेसु दूरङ्गएसु चिरट्ठिएसु[12]। ते णं तत्थ देवा भवन्ति महिड्ढिया[13] जाव चिरट्ठिइया हारविराइयवच्छा[14] कडगतुडियथम्भियभुया[15] अङ्गदकुण्डलमट्ठगण्डतलकण्णपीढधारी[16] विचित्तहत्थाभरणा विइत्तमालामउली,[17] विदीप्तानि विचित्राणि वा मउलि त्ति मुकुटविशेषः, [कल्लाणपवरवत्थपरिहिया[18]], कल्लाणगपवरमल्लाणुलेवणधरा[19] भासुरबोन्दी[20] पलम्बवणमालाधरा दिव्वेणं

---

1 a f निव्वाण०। 2 a f इहं। 3 e केवलतया। 4 a f परिनिव्वांति, e परिनिव्वायते। 5 e भवतीति। 6 e करेइ। 7 e एग०। 8 a f अद्वितीयाः पू०। 9 e ०नुष्ठानं 10 a f पुनरेके केचन ये न सिध्यन्ति। 11 e महज्जुएसु। 12 a चिरट्ठितेसु। 13 a f om. 14 a e f ०वत्था। 15 Compare the commentaryf to § 112. 16 a f ०गंडयल०। 17 e विचित्त०; a e ०मउलिमउडा, f ०मउलि। 18 a f om 19 a e f ०वत्थाण० for ०मल्लाण०। 20 a f भासरवांदी।

वर्णेणं दिव्वेणं गन्धेणं दिव्वेणं फासेणं दिव्वेणं सङ्घयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए[1] पभाए[1] दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दसदिसाओ[2] उज्जोएमाणा पभासेमाणा गइकल्लाणा[3] ठिइकल्लाणा आगमेसिभद्दा पासाईया दरसणिज्जा अभिरूवा पडिरूवा ॥ तमाइक्खइ, यदिह धर्मफलं तदाख्याति ॥ तथा एवं खलु चउहिं ठाणेहिं जीवा नेरइयत्ताए कम्मं पकरेन्ति। एवमिति वक्ष्यमाणप्रकारेणेति। नेरइयत्ताए कम्मं पकरेत्ता नेरइएसु उववज्जन्ति। तं जहा। महारम्भयाए महापरिग्गहयाए[4] पञ्चेन्दियवहेणं कुणिमाहारेणं, कुणिमं ति मांसम् ॥ एवं च एएणं अभिलावेणं, तिरिक्खजोणिएसु, माइल्लयाए अलियवयणेणं उक्कञ्चणयाए वञ्चणयाए। तत्र माया वञ्चनबुद्धिः, उत्कञ्चनं मुग्धवञ्चनप्रवृत्तस्य[5] समीपवर्त्ति विदग्धचित्तरक्षणार्थं[6] क्षणमव्यापारतया अवस्थानं, वञ्चनं प्रतारणम्[7] ॥ मणूसेसु[8], पगइभद्दयाए पगइविणीययाए साणुक्कोसयाए अमच्छरियाए। प्रकृतिभद्रकता स्वभावत एवापरोपतापिता, अनुक्रोशो दया ॥ देवेसु, सरागसंजमेणं संजमासंजमेणं अकामनिज्जराए बालतवोकम्मेणं ॥ तमाइक्खइ। यदेवमुक्तरूपं नारकत्वादिनिबन्धनं तदाख्यातीत्यर्थः ॥ तथा

जह नरया गम्मन्ती[9] जे नरया जायवेयणा नरए ।
सारीरमाणसाइं दुक्खाइं[10] तिरिक्खजोणीए ।१।

---

१ e om. २ e ०दिसाए। ३ a e f गई०। ४ e परिग्गहाए। ५ e मुग्धवञ्चनं प्र०। ६ e om. चित्त। ७ e विप्रतारणं। ८ So a e f for the usual मणुस्सेसु। ९ e गमन्ती। १० a f सुक्खाइं, e दुक्खाइं।

माणुस्सं च अणिच्चं वाहिजरामरणवेयणापउरं।
देवे[1] य देवलोए देवेहिं देवसोक्खाइं ।२।

देवांश्च देवलोकान्देवेषु देवसौख्यान्याख्यातीति।

नरगं तिरिक्खजोणिं माणुसभावं च देवलोगं च।
सिद्धिं च सिद्धवसहिं[2] छज्जीवणियं परिकहेइ।३।
जह जीवा बज्झन्ती मुच्चन्ती जह य संकिलिस्सन्ति।
जह दुक्खाणं अन्तं करेन्ति केई अपडिबद्धा।४।
अट्टा[3] अट्टियचित्ता[4] जह जीवा दुक्खसागरमुवेन्ति।
जह वेरग्गमुवगया कम्मसमुग्गं[5] विहाडेन्ति।५।

आर्त्ताः शरीरतो दुःखिनाः, आर्त्तितचित्ताः शोकादिपीडिताः, आर्त्ताद्वाध्यानविशेषादार्त्तितचित्ता इति॥

जह रागेण कडाणं कम्माणं पावओ फलविवागो।
जह य परिहीणकम्मा सिद्धा सिद्धालयमुवेन्ति।६।

अथानुष्ठेयानुष्ठानलक्षणं धर्ममाह॥ तमेव धम्मं दुविहमाइक्खियं। येन धर्मेण सिद्धाः सिद्धालयमुपयान्ति[6] स एव धर्मो द्विविध आख्यात इत्यर्थः॥ तं जहा। अगारधम्मं[7] च[7] अणगारधम्मं च[7]। अणगारधम्मो। इह खलु सव्वओ, सर्वान्धनधान्यादिप्रकारानाश्रित्य; सव्वत्ताए सर्वात्मना सर्वैरात्मपरिणामैरित्यर्थः। अगाराओ[8] अण-

---

१ e देवा। २ e सिद्धिवसहिं। ३ a f अट्ठा, e अट्टा। ४ a f अट्ठिय०, e अट्टिय०। ५ a f समुग्गं। ६ a f उपयन्ति। ७ e om. ८ e आगार०।

गारियं पव्वइयस्स[१] सव्वाओ पाणाइवायाओ वेरमणं, एवं मुसावाय-अदिणादाणमेहुणपरिग्गहराईभोयणाओ[२] वेरमणम्॥ एवं अयमाउसो[३] अणगारसामाइए धम्मे पणत्ते। एयस्स धम्मस्स सिक्खाए उव-ट्ठिए निग्गन्थे वा निग्गन्थी वा[४] विहरमाणे[५] आणाए[६] आराहए[७] भवइ॥ अगारधम्मं[८] दुवालसविहं आइक्खइ। तं जहा। पञ्चाणुव्वयाइं तिण्णि गुणव्वयाइं चत्तारि सिक्खावयाइं। पञ्च अणुव्वयाइं[९]। तं जहा। थूलाओ पाणाइवायाओ वेरमणं, एवं मुसावायाओ[१०] अदिणा-दाणाओ[१०] सदारसन्तोसे इच्छापरिमाणे। तिण्णि गुणव्वयाइं। तं जहा। अणट्ठादण्डवेरमणं दिसिव्वयं उवभोगपरिभोगे[११] परिमाणं। चत्तारि सिक्खावयाइं। तं जहा। सामाइयं देसावगासियं पोस-होववासो अतिहिसंविभागो[१२]। अपच्छिममारणन्तियसंलेहणाझूसणा-आराहणा॥ अयमाउसो अगारसामाइये धम्मे पणत्ते। एयस्स धम्मस्स सिक्खाए[१३] उवट्ठिए समणोवासए समणोवासिया वा विहर-माणे आणाए आराहए भवइ॥ तए णं सा[१४] महइमहालिया मणू-सपरिसा समणस्स भगवओ महावीरस्स अन्तिए धम्मं सोच्चा निसम्म हट्ठतुट्ठ[१५] जाव हियया उट्ठाए उट्ठेइ, २त्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ, २त्ता वन्दइ नमंसइ, २त्ता

---

१ e पव्वइयस्संति। २ e मुसावायाओ वेरमणं अदिन्नादाणाओ वेरमणं मेहु-णाओ वेरमणं परिग्गहराईभोयणाओ वेरमणं। ३ a अयमाओसो। ४ e adds २ after वा। ५ a विहरमाणा। ६ f om. ७ a f आहारए। ८ e अगार॰। ९ e add ति after अणुव्वयाइं। १० e adds वेरमणं। ११ a f ॰परिभोगमाणं। १२ a f अहासंविभागो। १३ e सिक्खावए। १४ a e f से। १५ a f हट्ठतुट्ठा।

पव्वइया मुण्डा[1] भवित्ता अगाराओ अणगारियं पव्वइया, अप्पेगइया पञ्चाणुव्वइयं सत्तसिक्खावइयं दुवालसविहं गिहिधम्मं पडिवन्ना॥ अवसेसा णं[2] परिसा समणं भगवं[3] महावीरं[3] वन्दित्ता नमंसित्ता[4] एवं वयासी। "सुयक्खाए णं, भन्ते, निग्गन्थे पावयणे, एवं सुपन्नत्ते, भेदतः, सुभासिए, वचनव्यक्तितः, सुविणीए, सुष्ठु शिष्येषु विनियोजनात्, सुभाविए तत्त्वभणनात्, अणुत्तरे, भन्ते, निग्गन्थे पावयणे। धम्मं[5] तं आइक्खमाणा[6] उवसमं[7] आइक्खइ, क्रोधादिनिग्रहमित्यर्थः, उवसमं आइक्खमाणा विवेगं आइक्खइ, बाह्यग्रन्थत्यागमित्यर्थः, विवेगं आइक्खमाणा वेरमणं आइक्खइ, पापनिवृत्तिमित्यर्थः, वेरमणं आइक्खमाणा अकरणं पावाणं कम्माणं आइक्खइ, धर्मसुपशमादिरूपं ब्रूथेति[8] हृदयम्[9]। नत्थि णं अन्ने केइ समणे वा माहणे वा जे एरिसं धम्ममाइक्खित्तए, प्रभुरिति शेषः। किमङ्ग पुण एत्तो उत्तरतरं"। एवं वन्दित्ता जामेव दिसं[10] पाउब्भूया, तामेव दिसं[10] पडिगया त्ति॥

॥११८॥ अट्ठे[11] समट्ठे त्ति। अस्त्येषो ऽर्थ इत्यर्थः, अथवा अर्थः[12] योदितवस्तुसमर्थः सङ्गतः॥ हन्ता इति कोमलामन्त्रणवचनम्॥

॥११९॥ अज्जो त्ति आर्या[13] इत्येवमामन्त्र्यैवमवादीदिति॥ जाव त्ति यावत्करणादिदं दृश्यम्। खमन्ति तिइक्खन्ति।

---

1 f मुंडे। 2 e om. 3 a f only ३। 4 a f only २। 5 e adds सपहाँ before धम्मं। 6 e अइक्खमाणे। 7 e adds तं after उवसमं। 8 e बूसेति। 9 a f हृदवं। 10 e दिसिं। 11 a अत्थे समट्ठे। 12 e om. 13 a आर्योः। इति रेवम॰, e आर्या इति एवम॰।

एकार्थास्त्वेते विशेषव्याख्यानमप्येषामस्ति, तदन्यतो ऽवसेयमिति ॥

निक्खेवओ त्ति निगमनवाक्यं वाच्यम्। तच्चेदं "एवं खलु, जम्बू, समणेणं जाव सम्पत्तेणं दोच्चस्स अज्झयणस्स अयमट्ठे पण्णत्ते त्ति बेमि"॥

॥ इति उपासकदशानां द्वितीयाध्ययनविवरणं समाप्तम् ॥

तृतीयमध्ययनम् ॥

अथ तृतीयं व्याख्यायते। तत्सुगममेव ॥ नवरं उक्खेवो[1] त्ति उपक्षेप उपोद्घातः तृतीयाध्ययनस्य वाच्यः। स चायम्। "जइ णं, भन्ते, समणेणं भगवया जाव सम्पत्तेणं उवासगदसाणं दोच्चस्स अज्झयणस्स अयमट्ठे पण्णत्ते, तच्चस्स[2] णं, भन्ते, के अट्ठे पण्णत्ते" इति कण्ठ्यश्चायम् ॥

॥ १२६ ॥ तथा[3] क्वचित्कोष्टकं चैत्यमधीतं, क्वचिन्महाकामवनमिति[4] ॥

॥ १२७ ॥ श्यामा[5] नाम भार्या ॥

॥ १२८ ॥ तओ मंससोल्ले[6] त्ति त्रीणि मांसशूल्यकानि, शूले पच्यन्ते इति शूल्यानि, त्रीणि मांसखण्डानीत्यर्थः ॥ आदाणभरि-

---

१ a f उक्खेवउ, e उक्खेवो। २ a f om. from तच्चस्स up to पण्णत्ते। ३ e adds कोट्ठए त्ति। ४ a e f ॰धनम्; the error is due to the great similarity of the old Nāgarī signs for *dh* and *v*. ५ e prefixes सामा नामं ति। ६ a f सोल्लए।

ति आदाणमाद्दहणं[1], यदुदकतैलादिकमन्यतरद्रव्यपाकायाावृत्ताप्यते[2] तद्भृते॥ **कडाहंसि त्ति** कटाहे लोहमयभाजनविशेषे॥ आर्द्रहयाम्युत्क्वाथयामि[3]॥ **आइञ्चामि त्ति** आसिञ्चामि॥

॥१४१॥ **एस णं तए[4] विदरिसणे दिट्टे त्ति** एतच्च त्वया ... र्शनं विरूपाकारं[5] विभीषिकादि दृष्टमवलोकितमिति॥ **भग्ग-[6] त्ति** भग्नव्रतः, स्थूलप्राणातिपातविरतेर्भावतो भग्नत्वात्, तद्वि-...ार्थं कोपेनोद्धावनात्, सापराधस्यापि व्रतविषयीकृतत्वात्॥ ...**नियमः** कोपोदयेनोत्तरगुणस्य क्रोधाभिग्रहरूपस्य भग्नत्वात्॥ ...**पोषधो** ऽव्यापारपौषधभङ्गत्वात्॥ **एयस्स त्ति** द्वितीयार्थत्वात् ...स्याः, एतमर्थमालोचय गुरुभ्यो निवेदय। यावत्करणात्पडि-क्कमाहि निवर्त्तस्व, निन्दाहि आत्मसाक्षिकां कुत्सां कुरु, गरिहाहि गुरुसाक्षिकां कुत्सां विधेहि, विउट्टाहि वित्रोटय तद्भावानुबन्धच्छेदं विधेहि, विसोहेहि अतिचारमलक्षालनेन, अकरणयाए अब्भुट्टेहि तदकरणाभ्युपगमं कुरु, अहारिहं तवोकम्मं पायच्छित्तं पडिवज्जाहि त्ति प्रतीतम्। एतेन[7] च निशीथादिषु[8] गृहिणः प्रतिप्रायश्चित्तस्याप्रतिपादनान्न तेषां प्रायश्चित्तमस्तीति ये प्रतिपद्यन्ते, तन्मतमपास्तं[9] साधूद्देशेन गृहिप्रायश्चित्तस्य जीतव्यवहारानुपातित्वात्[10]॥

॥ इति उपासकदशानां[11] तृतीयाध्ययनस्य[12] विवरणं समाप्तम्[13]॥

---

१ a e f ०माद्दहणं। २ a ०पाकायानांवृत्ताप्यते, f ०पाकायानावृत्ताप्यते। ३ a f ...द्दहयाम्यु०, e त्राद्दयाम्यु०। ४ e तु, text तुमे (Hem III, 94). ५ f नि-...ाकारं। ६ e भग्गवइ। ७ a f एतेनिच। ८ e निपीथा०। ९ e अपास्तं। १० a जीतव्यव०, e जीवतव्यव०, f जीजव्यव०। ११ a f ०दशा। १२ a f ...यन। १३ a f om.

## चतुर्थमध्ययनम् ॥

॥ १४५ ॥ अथ चतुर्थमारभ्यते[1]। तदपि सुगमम् ॥ नवरं चैत्यं कोउकं, पुस्तकान्तरे काममहावनम्[2]। धन्या च भार्या ॥

॥ १४८ ॥ **जमगसमगं ति** यौगपद्येनेत्यर्थः ॥ **सासे** इत्यादौ यावत्करणादिदं दृश्यम्। सासे १, कासे २, जरे ३, दाहे ४, कुच्छिसूले ५, भगन्दरे ६, अरिसा ७, अजीरए[3] ८, दिट्ठी ९, मुद्धसूले १०, अकारए ११, अच्छिवेयणा १२, कस्रवेयणा १३, कण्डू १४, उदरे १५, कोढे १६। अकारकः अरोचकः ॥

॥ इति चतुर्थाध्ययनविवरणं[4] समाप्तम्[5] ॥

## पञ्चममध्ययनम् ॥

पञ्चमं कण्व्यम् ॥

## षष्ठमध्ययनम् ॥

षष्ठे किमपि लिख्यते ॥

॥ १६६ ॥ **धम्मपस्नत्ति त्ति** श्रुतधर्मप्ररूपणादर्शनं मतं सिद्धान्त इत्यर्थः ॥ **उत्थानं** उपविष्टः सन् यदूर्द्धो भवति ॥ **कर्म** गमनादिकम् ॥ **बलं** शारीरम् ॥ **वीर्यं** जीवप्रभवम् ॥ **पुरुषकारः**[6] पुरुषत्वाभिमानः, **पराक्रमः** स एव ॥ सम्पादितस्वप्रयोजनः इति उपदर्शनेवा-

---

१ e चतुर्थमध्ययनमारभ्यते। २ a f ०वनम्। ३ e अजीरये। ४ a f चतुर्थं। ५ a f om. ६ e पुरुषाकारः।

विकल्पे[1], नास्त्येतदुत्थानादि जीवानां, एतस्य पुरुषार्थाप्रसाधकत्वात्[2], तदसाधकत्वं[3] च पुरुषकारसद्भावे ऽपि पुरुषार्थसिध्यनुपलम्भात् ॥ एवं च नियताः सर्वभावाः । यैर्यथा भवितव्यं; ते तथैव भवन्ति, न पुरुषकारबलादन्यथा[4] कर्तुं शक्यन्त[5] इति । आह च ।

प्राप्तव्यो नियतिबलाश्रयेण यो ऽर्थः
सो ऽवश्यं भवति नृणां शुभो ऽशुभो वा ।
भूतानां महति कृते ऽपि हि प्रयत्ने
नाभाव्यं भवति न भाविनो ऽस्ति नाशः ॥

तथा ।

नहि भवति यन्नभाव्यं, भवति च भाव्यं विनापि यत्नेन ।
करतलगतमपि[6] नश्यति यस्य तु भवितव्यता नास्ति ॥

इति ॥ मङ्गुलि[7] त्ति असुन्दरा धर्मप्रज्ञप्तिः श्रुतधर्मप्ररूपणा । किंस्वरूपामित्याह अस्तीत्यादि ॥ अनियताः सर्वभावाः उत्थानादेर्भवन्ति, तदभावान्न भवन्तीति कृत्वेत्येवंस्वरूपा ॥

॥ १६७–१६८ ॥ ततो ऽसौ कुण्डकोलिकः तं देवमेवमवादीत् । यदि गोशालकस्य[8] सुन्दरो धर्मो, "नास्ति कर्मादीत्यतो नियताः सर्वभावा" इत्येवंरूपो, मङ्गुलश्च महावीरधर्मो "ऽस्ति कर्मादीत्यनियताः सर्वभावा" इत्येवं स्वरूपः, इत्येवं तन्मतमनूद्य

---

१ a f इतिरूपदर्शनेऽवाविकल्पे । २ e ०र्थप्रसाध० । ३ e तदसाधकं च । ४ e थाकारः । ५ e शक्यन्ते इति । ६ e reads करतलगतमिव न पश्यति यस्य तु वि० ना० । ७ a f मंगुल त्ति । ८ a e f गोसालकस्य ।

कुण्डकोलिकस्तन्मतदूषणाय विकल्पद्वयं कुर्वन्नाह। **तुमे एमि**त्यादिपूर्ववाक्ये[१] यदीति पदोपादानादेतस्य वाक्यस्यादौ तदेति पदं द्रष्टव्यं इति। त्वयायं दिव्यो देवर्ध्यादिगुणः केन हेतुना लब्धः, किमुत्थानादिना, **उदाहु त्ति** अहोस्वित्[२] अनुत्थानादिना तपोब्रह्मचर्यादीनामकरणेनेति भावः। यद्युत्थानादेरभावेनेति पक्षो गोशालकमताश्रितत्वाद् भवतः, तथा येषां जीवानां नास्त्युत्थानादि तपश्चरणकरणमित्यर्थः, ते इति जीवाः किं न देवाः?। पृच्छतो ऽयमभिप्रायः। यथा त्वं पुरुषकारं विना देवः संवृत्तः स्वकीयाभ्युपगमतः, एवं सर्वजीवा ये उत्थानादिवर्जितास्ते देवाः प्राप्नुवन्ति, न चैतदेवमिष्टमित्युत्थानाद्यपलापपक्षे दूषणम्। अथ त्वयेयं ऋद्धिरुत्थानादिना[३] लब्धा। ततो यद्वदसि "सुन्दरा गोशालकप्रज्ञप्तिरसुन्दरा[४] महावीरप्रज्ञप्तिः" इति, तत्ते तव मिथ्यावचनं भवति[५] तस्य व्यभिचारादिति॥

॥ १७० ॥ ततो ऽसौ देवस्तेनैवमुक्तः सन् **शङ्कितः** संशयवान् जातः, "किं गोशालकमतं[४] सत्यमुत महावीरमतम्"?। महावीरमतस्य[६] युक्तितो ऽनेन प्रतिष्ठितत्वादेवंविधविकल्पवान् संवृत्त इत्यर्थः॥ **काङ्क्षितो** महावीरमतमपि[७] साध्वेतद्युक्त्युपेतत्वादिति[८] विकल्पवान् संवृत्त इत्यर्थः॥ यावत्करणाद्भेदमापन्नो[९] मतिभेदमुपागतो गोशालकमतमेव[४] साध्विति निश्चयादपोढत्वात्॥ तथा कलुषं समापन्नः

१ a f एमित्यादौ पू०। २ e f ०स्वित्। ३ a f ऋद्धिरुपत्थानादिना। ४ e गोसालक०। ५ a f भवतेव। ६ e महावीरस्य, om. मत। ७ e ममापि। ८ a f ०त्युपपेतत्वादिति। ९ e ०भेदसमापन्नो।

प्रा...नियविपर्ययलक्षणं गोशालमतानुसारिणां मतेन मिथ्यात्वं प्राप्त इत्यर्थः। अथवा कलुषभावं जितो ऽहमनेनेति खेदरूपमापन्न इति ॥ नो संचाएइ[1] त्ति न शक्नोति । पामोक्खं ति प्रमोक्षमुत्तरमाख्यातुं भणितुमिति ॥

॥ १७४ ॥ गिहमज्झावसन्ता[2] णं ति गृहं[3] अध्यावसन्तो, णमिति वाक्यालङ्कारे[4] । अन्ययूथिकान् अर्थैर्जीवादिभिः सूत्राभिधेयैर्वा । ...भिरन्वयव्यतिरेकलक्षणैः । प्रश्नैश्च परप्रश्नणीयपदार्थैः[5] । कारणै-...पत्तिमात्ररूपैः । व्याकरणैश्च परेण प्रश्नितस्योत्तरदानरूपैः ॥ ...॥ निप्पिणवागरणे[6] त्ति निरस्तानि स्पष्टानि व्यक्तानि[7] प्रश्नव्याकरणानि येषां, ते निःस्पष्टप्रश्नव्याकरणाः[8], प्राकृतत्वाद्वा निष्पिष्टप्रश्नः॥ रणास्तान् कुर्वन्ति ॥ सक्का पुण त्ति शक्या एव ॥ हे ...र्याः श्रमणैरन्ययूथिका निःस्पष्टप्रश्नव्याकरणाः कर्तुम् ॥

॥ इति षष्ठं विवरणतः समाप्तम् ॥

## सप्तममध्ययनम् ।

॥ १८१ ॥ सप्तमं सुगममेव, नवरं आजीविओवासए त्ति आजीविका गोशालकशिष्याः, तेषामुपासक आजीविकोपासकः ॥ ...श्रुतार्थः श्रवणतो, गृहीतार्थो बोधतः, पृष्टार्थः संशये सति, विनि-...तार्थ उत्तरलाभे सति ॥

---

१ a f संचाइए । २ f गिहिमज्झा० । ३ e गृहमध्यावसंतो । ४ a f om. ...त्व । ५ e ०प्रश्नीय० । ६ e निप्पिट्ठपसिण० । ७ e adds वागरणानि after व्यक्तानि । ८ e निस्पष्ट० ।

॥ १८४ ॥ **दिसभइभत्तवयण**[1] **त्ति** इत्तं भृतिभक्तरूपं[2] द्रव्य-भोजनलक्षणं[3] वेतनं मूल्यं येषां ते तथा ॥ **कल्लाकल्लिं**[3] **ति** प्रति-प्रभातम् ॥ **बहुकरकान्**वार्घटिकाः, **वारकांश्च** गडुकान्, **पिठरका-न्**स्थालीः, **घटकान्**प्रतीतान्, **अर्द्धघटकांश्च** घटार्द्धमानान्, **कलश-कान्**आकारविशेषवतो[4] वृहद्घटकान्, **अलिञ्जराणि**[5] च महदुदक-भाजनविशेषान्, **जम्बूलकांश्च** लोकरूढ्यावसेयान्,[6] **उष्ट्रिकाश्च**[7] सुरा-तैलादिभाजनविशेषान् ॥

॥ १८७ ॥ **एहिइ त्ति**[8] एष्यति ॥ **इहं ति** अस्मिन्नगरे ॥ **महामाहणे त्ति** 'मा[9] हन्मि' न हन्मीत्यर्थः, आत्मना वा ह[ं]निवृत्तः परं प्रति 'मा हन' इत्येवमाचष्टे यः स माहनः । एव मनःप्रभृतिकरणादिभिराजन्म सूक्ष्मादिभेदभिन्नजीवहननन[ि]वृ[त्ति]त्वा-न्महान्माहनो महामाहनः ॥ **उत्पन्ने** आवरणक्षयेणाविर्भूते ज्ञानद-र्शने धारयति यः स तथा ॥ अत एवा**तीतप्रत्युत्पन्नानागतज्ञापकः**[10]॥ **अरह त्ति** अर्हन्महाप्रातिहार्यरूपपूजार्हत्वात्,[11] अविद्यमानं वा रह[12] एकान्तः सर्वज्ञत्वाद्यस्य सो ऽरहाः[13] ॥ **जिनो** रागादिजेतृत्वात् ॥ केवलानि परिपूर्णानि शुद्धान्यनन्तानि वा ज्ञानादीनि यस्य सन्ति स **केवली** ॥ अतीतादिज्ञानेऽपि सर्वज्ञानं प्रतिशङ्का स्यादित्याह, **सर्वज्ञः** साकारोपयोगसामर्थ्यात्, **सर्वदर्शी** अनाकारोपयोगसाम-

---

१ a e f दिन्न० । २ e द्रव्यं भोजन० । ३ a f ०कल्लि त्ति, e कल्लिं त्ति । ४ a e f कलसका० । ५ a f अरंजराणि । ६ e ०रूढ्यवसेयान् । ७ e उष्ट्रिकांश्च । ८ a e f एहि त्ति । ९ a f om. from मा हन्मि down to आजन्म incl., beginning with सूक्ष्मादि० । १० a f ०प्रत्युत्पन्नागत० ; a e f ज्ञायकः । ११ e reads अर्हन्नष्टमहाप्रातिहार्यरूपपूजा अर्हत्वात् । १२ e रहं । १३ e ऽरहा ।

थाईति ॥ तथा तेलोक्कवहियमहियपूइए त्ति त्रैलोक्येन त्रिलोकवासिना जनेन, वहिय त्ति समग्रैश्वर्याद्यतिशयसन्दोहदर्शनसमाकुलचेतसा[1] हर्षभरनिर्भरेण प्रबलकुतूहलबलादनिमिषलोचनेनावलोकितः, महिय त्ति सेव्यतया वाञ्छितः, पूजितश्च पुष्पादिभिर्यः स तथा ॥ एतदेव व्यनक्ति। सदेवा[2] मनुजासुरा[3] यस्मिन्स सदेवमनुजासुरस्तस्य लोकस्य प्रजायाः, अर्चनीयः पुष्पादिभिः,[4] वन्दनीयः स्तुतिभिः, सत्करणीय[5] आदरणीयः, सम्माननीयोऽभ्युत्थानादिप्रतिपत्तिभिः, कल्याणं मङ्गलं दैवतं चैत्यमित्येवं बुद्ध्या पर्युपासनीय इति ॥ तच्चकम्म[6] त्ति तथ्यानि सत्फलाव्यभिचारतया[7] यानि[8] कर्माणि क्रियास्तत्सम्पदा तत्समृद्ध्या यः सम्पयुत्तो[9] युक्तः स तथा ॥

॥ १८८ ॥ कल्लमित्यत्र यावत्करणात्पाउप्पभायाए रयणीए इत्यादिर्जलन्ते[10] सूरिए इत्येतदन्तः प्रभातवर्णको[11] दृश्यः, स चोत्पिन्नज्ञानवृद्धाख्येयः[12] ॥

॥ १८९ ॥ वायाहयगं[13] ति वाताहतं वायुनेषच्छोषमानीतमि-

---

1 e समग्र ऐश्वर्या०। २ e सदेवमनुजा०। ३ a f मनुजासुराः। ४ e inserts पूजनीयः after पुष्पादिभिः। ५ e सत्कारणीयः। ६ a f तव्वकम्म। ७ e reads तत्फलान्यव्यभिचारितया। ८ e om. ९ e संप्रयुक्तः, om. युक्तः। १० e इत्यादि जलन्ते। ११ The conclusion of the varṇaka, as here indicated, presupposes a somewhat different recension from that usually found in Jain works, e. g., in Kap. § 59, Nāy. § 34, where the conclusion runs thus: सूरे सहस्सरस्सिंमि दिणयरे तेयसा जलन्ते। १२ a f ०ज्ञानवद्धा०, e ०ज्ञानवृद्धा०। १३ a वाहयगं, e वायाहतगं।

त्यर्थः ॥ कोलालभण्डं ति कुलालाः कुम्भकाराः, तेषामिदं कौलालं, तच्च तद्भाण्डं च पण्यं भाजनं वा कौलालभाण्डम्[१] ॥

॥ १९८,१९९ ॥ "एतत्किं पुरुषकारेणेतरथा वा क्रियते" इति भगवता पृष्टे, स गोशालकमतेन नियतिवादलक्षणेन[२] भावितत्वात्पुरुषकारेणेत्युत्तरदाने च स्वमतक्षतिपरमत[illegible] दोषमाकलयन् "अपुरुषकारेण" इत्युवाच ॥

॥ २०० ॥ ततस्तदभ्युपगतनियतिमतनिरासाय पुनः प्रश्नमाह "सद्दालपुत्त" इत्यादि । यदि तव कश्चित्पुरुषो वाताहतं वा आममित्यर्थः, पक्केल्लयं व त्ति पक्कं वा अग्निना कृतपाकं अवहरेद्वा[३] चोरयेत्, विकिरेद्वा[४] इतस्ततो विक्षिपेत्, भिन्द्याद्वा[५] काणताकरणेन, आच्छिन्द्याद्वा[६] हस्तादुद्दालनेन, पाठान्तरेण विच्छिन्द्याद्वा विविधप्रकारैश्छेदं कुर्यादित्यर्थः, परिष्ठापये[illegible] बहिर्नीत्वा त्यजेदिति । वत्तेज्जासि[७] त्ति निर्वर्त्तयसि ॥ आक्रोशेज्ज वा त्ति आक्रोशयामि वा 'मृतोऽसि त्वम्' इत्यादिभिः शापैरभिशपामि, हन्मि वा दण्डादिना, बध्नामि वा रज्ज्वादिना, [illegible] वा 'ज्ञास्यसि रे दुष्टाचार' इत्यादिभिर्वचनविशेषैः, [illegible] वा चपेटादिना, निश्छोटयामि[१०] वा धनादित्याजनेन, [illegible] वा परुषवचनैः,[११] अकाल एव च जीविताद्वा व्यपरोपयामि मार-

---

१ a f कौलालं भाण्डं । २ e नियतवाद० । ३ e अवहरेद्वा । ४ conjectural (or विष्क्रिरेद्), a e f विकरेद्वा । ५ e pref. भिंदिज्ज त्ति । ६ e pref. अच्छिंदिज्ज त्ति । ७ e निवत्तेज्जासि । ८ a e f आउसेज्ज । ९ a f तज्जेमासि । १० a e f निःछोटयामि । ११ e परपरुष० ।

य शौर्यर्थः ॥ इत्येवं भगवांस्तं सद्दालपुत्रं स्ववचनेन पुरुषकाराभ्युपगमं[1] ग्राहयित्वा तन्मतविघटनायाह "सद्दालपुत्त" इत्यादि । न खलु तव भाण्डं कश्चिदपहरति, न च त्वं तमाक्रोशयसि, यदि सत्यत[2] एव नास्त्युत्थानादि । अथ कश्चित्तदपहरति, त्वं च तमाक्रोशयसि । तत एवमभ्युपगमे सति यद्वदसि "नास्त्युत्थानादि" इति,[3] तत्ते मिथ्या असत्यमित्यर्थः ॥

॥ २०५, २०८ ॥ तए णं सा अग्गिमित्ता इत्यादि । ततः सा अग्निमित्रा भार्या सद्दालपुत्रस्य श्रमणोपासकस्य तथेति एतमर्थं[4] विनयेन प्रतिशृणोति । श्रुत्वा च ण्हाता । कृतबलिकर्मा[5] बलिकर्म लोकरूढम् । कृतकौतुकमङ्गलप्रायश्चित्ता कौतुकं मषीपुण्ड्रादि मङ्गलं दध्यक्षतचन्दनादि, एते एव[6] पायच्छित्तमिव[7] प्रायश्चित्तं दुःस्वप्नादिप्रतिघातकत्वेनावश्यं कार्यत्वादिति । शुद्धात्मा वेषिकाणि[8] वेषार्हाणि मङ्गल्याणि प्रवरवस्त्राणि परिहिता । अल्पमहार्घाभरणालङ्कृतशरीरा ॥ ...टिकाचक्रवालपरिकीर्णा ॥ पुस्तकान्तरे यानवर्णको दृश्यते । स एवं सव्याख्यानोऽवसेयः । लहुकरणजुत्तजोइयं लघुकरणेन दक्षत्वेन ये युक्ताः पुरुषास्तैर्योजितं यन्त्रयूपादिभिः[9] सम्बन्धितं यत्तत्तथा । तथा समखुरवालिहाणसमलिहियसिङ्गएहि समखुरवालिधानौ तुल्यशफपुच्छौ समे लिखिते चोल्लिखिते[10] शृङ्गे ययोस्तौ तथा[11]

---

१ e पुरुषाकारा॰ । २ e सत्यमेव । ३ e om. इति । ४ e एतदर्थं । ५ a f om. ६ e च । ७ a e f प्रायच्छित्तमिव । ८ e वैषयिकाणि । ९ e यन्त्ररूपादिभिः । १० e इवोल्लिखिते । ११ e adds तौ च यौ तौ after तथा ।

ताभ्यां गोयुवभ्यामिति[१] सम्बन्धः। जम्बूणयामयकलावजोत्तपइविसिट्ठएहिं[२] जाम्बूनदमयौ कलापौ ग्रीवाभरणविशेषौ योक्त्रे च कण्ठबन्धनरज्जू[३] प्रतिविशिष्टे शोभने ययोस्तौ तथा ताभ्याम्। रययामयघण्टसुत्तरज्जुगवरकञ्चणखइयनत्थापग्गहोग्गहियएहिं[४] रजतमय्यौ रूप्यविकारौ घण्टे ययोस्तौ तथा, सूत्ररज्जुके कार्पासिकसूत्रमय्यौ ये वरकाञ्चनखचिते नस्ते नासारज्जू तयोः प्रग्रहेण रश्मिनावगृहीतकौ च बद्धौ यौ तौ तथा ताभ्याम्। [illegible] लकयामेलएहिं[५] नीलोत्पलकृतशेखराभ्याम्। पवरगोण[illegible] नाणामणिकणगघण्टियाजालपरिगयम्। सुजायजुगजु[illegible] त्यसुविरइयनिम्मियं[६] सुजातं[७] सुजातदारुमयं युगं यूपः ऋजुकं सङ्गतं ऋजुकं सरलं सुविरचितं सुघटितं निर्मितं निवेशितं यत्र तत्तथा। जुत्तामेव धम्मियं जाणप्पवरं उवट्ठवेह युक्तमेव सम्बद्धमेव[८] गोयुवभ्यामिति[९] सम्बन्ध इति॥

॥ २१८॥ महागोवेत्यादि गोपो गोरक्षकः, स चेतरगोरक्षकेभ्योऽतिविशिष्टत्वान्महानिति महागोपः॥ नस्सत इति सन्मार्गाच्च्यवमानान्। विनस्सत इत्यनेकशो म्रियमाणान्। [illegible]नान् मृगादिभावे व्याघ्रादिभिः। छिद्यमानान् मनुष्यादिभावे

१ e reads गोवायुवाभ्यामिति। २ a f ०पविविसिट्ठएहिं। ३ e रज्जुप्रति०। ४ a e ०खचियन्नत्थ (e न्नच्छ) पग्गहोगहिएहिं। ५ a e f ०मेलएहिं। ६ e ०निम्मयं। ७ pref. सुजायं। ८ e संबंधमेव। ९ a e f गोयुवाभ्यामिति।

...ादिना। भिद्यमानान्[1] कुन्तादिना[2]। लुप्यमानान् कर्णना-
सादिच्छेदनेन[3]। विलुप्यमानान् बाह्योपध्यपहारतः[4]। गा[5] इवेति
गम्यते॥ निव्वाणमहावाडं[6] ति सिद्धिमहागोस्थानविशेषम्॥ सा-
... त्ति स्वहस्तेनेव[7], स्वहस्तेन साक्षादित्यर्थः॥ महासार्थवाहा-
लापकानन्तरं पुस्तकान्तरे इदमपरमधीयते। "आगए णं, देवा-
णुप्पिया, इहं महाधम्मकही[8] नं।" "के णं, देवाणुप्पिया, महा-
धम्मकही[8]?"। "समणे भगवं महावीरे महाधम्मकही"। "से
केणट्ठेणं समणे भगवं महावीरे महाधम्मकही[8]?"। "एवं खलु
सद्दालपुत्ता, समणे भगवं महावीरे महइमहालयंसि[9] संसारंसि
बहवे जीवे[10] नस्समाणे जाव विलुप्पमाणे उम्मग्गपडिवन्ने सप्प-
हविप्पणट्ठे मिच्छत्तबलाभिभूए अट्ठविहकम्मतमपडलपडोच्छन्ने[11]
अट्ठेहि य हेऊहि य पसिणेहि य कारणेहि[12] य वागरणेहि य
...उरन्ताओ संसारकन्ताराओ साहत्थिं नित्थारेइ। से तेणट्ठेणं,
सद्दालपुत्ता, समणे भगवं महावीरे महाधम्मकहि[13]" त्ति। कण्ठ्यो
...यम्, नवरं जीवानां नश्यदादिविशेषणहेतुदर्शनायाह[14] उम्मग्गे-
त्यादि। तत्रोन्मार्गप्रतिपन्नानाश्रितकुदृष्टिशासनात्, सत्पथविप्रनष्टा-
न्त्यक्तजिनशासनात्[15]। एतदेव कथमित्याह। मिथ्यात्वबलाभिभू-
तान्, तथाष्टविधकर्मैव तमः, पडलमन्धकारसमूहः, तेन प्रत्यवच्छ-

---

१ e क्रियमानान्। २ e adds भिद्यमानान्। ३ e कर्णनाशादि०। ४ e बाह्योपध्युपहारतः। ५ a f ना, e गाव। ६ e ०माहावाडं। ७ e स्वहस्तेनैव। ८ e ०धम्मकहा। ९ e ०महालियंहि। १० a f om. जीवे। ११ e पडाच्छन्ने। ... ...हि। १३ e ०धम्मकह। १४ e ०हेतुं दर्श०। १५ a ०त्युक्तजिन०।

न्नानिति[१] ॥ तथा निर्यामकालापके बुड्डमाणे त्ति निमज्जतः। निवुड्डमाणे त्ति नितरां निमज्जतः, जन्ममरणादिजले इति गम्यते। उप्पियमाणे त्ति उत्प्लावमानान् ॥

॥ २१९ ॥ पभु त्ति प्रभवः समर्थाः ॥ इतिच्छेकाः इत्येवमुपलभ्यमानाद्भुतप्रकारेण, एवमन्यत्रापि। छेकाः प्रस्तावज्ञाः[२] कलापण्डिता इति वृद्धा व्याचक्षते ॥ तथा इतिदक्षाः कार्याणामविलम्बितकारिणः ॥ तथा इतिप्रष्ठाः[३] दक्षाणां प्रधाना वाग्मिन इति वृद्धैरुक्तम् ॥ क्वचित्पत्तट्ठा इत्यधीयते[४]। तत्र प्राप्तार्थाः कृतप्रयोजनाः ॥ तथा इतिनिपुणाः सूक्ष्मदर्शिनः कुशला इति च वृद्धोक्तम् ॥ इतिनयवादिनो नीतिवक्तारः[५] ॥ तथा इत्युपदेशलब्धाः, लब्धोपदेशा ॥ वचनान्तरे इतिमेधाविनः अपूर्वश्रुतग्रहणशक्तिमन्तः ॥ इतिविज्ञानप्राप्ताः अवाप्तसद्बोधाः ॥ से जहेत्यादि अथ यथानाम कश्चित्पुरुषः ॥ तरुणे त्ति वर्धमानवयाः,[६] वर्णादिगुणोपचित इत्यन्ये ॥ यावत्करणादिदं दृश्यम्। बलवं सामर्थ्यवान्। जुगवं युगं[७] कालविशेषः, तत्प्रशस्तमस्यास्तीति युगवान्। दुष्टकालस्य[८] बलहानिकरत्वात्तद्व्यवच्छेदार्थमिदं विशेषणम्। जुवाणे त्ति युवा वयःप्राप्तः[९]। अप्पायङ्के[१०] त्ति नीरोगः। थिरग्गहत्थे[११] त्ति सुलेखकवदस्थिराग्रहस्तो हि[१२] न गाढग्रहो भवतीति विशेषणमिदम्। दढपाणिपाए[१३] त्ति

---

१ e प्रत्यवच्छिन्नानिति। २ e pref. प्रशस्तकाः। ३ a e °प्रष्टाः। ४ e इत्यभिधियते। ५ e नीतेर्वक्तारः। ६ e प्रवर्द्धमान°। ७ a f जुगं, e जुगः। ८ e pref. न दुष्टकालवती (दुष्टकालवान्?)। ९ e युवावयः प्रायः (sic). १० Skr. अल्पातङ्कः। ११ e थिरग्गहे। १२ a f हितगाढ° ।१३ e दड्ढ°।

प्रतीतम्। पासपिट्ठन्तरोरुपरिणए त्ति पार्श्वौ च पृष्ठान्तरे च तद्विभागौ ऊरू[1] च परिणतौ निष्पत्तिप्रकर्षावस्थां गतौ यस्य स तथा, उत्तमसंहनन इत्यर्थः। तलजमलजुयलपरिघनिभबाऊ त्ति तलयोस्तालाभिधानवृक्षविशेषयोः यमलयोः[2] समश्रेणीकयोर्यद्युगलं, परिघश्चार्गला तन्निभौ[3] तत्सदृशौ बाहू यस्य स तथा, आयतबाहुरित्यर्थः। घणनिचयवट्टपालिखन्धे त्ति घननिचितोऽत्यर्थं निविडो दृढश्च वृत्तश्च[4] वर्तुलः, पालिवत्तडागादिपालीव[5] स्कन्धो ऽंशदेशो यस्य स तथा। चम्मेट्ठगदुहणमोट्ठियसमाहयनिचियगायकाए[6] त्ति चर्मेष्टका इष्टका[7] शकलादिभृतचर्मकुतपरूपा[8], यदाकर्षणेन धनुर्धरा व्यायामं कुर्वन्ति, द्रुघणो[9] मुद्गरो मौष्टिको मुष्टिप्रमाणः प्रोतचर्मरज्जुकः पाषाणगोलकस्तैः समाहतानि व्यायामकरणप्रवृत्तौ सत्यां ताडितानि निचितानि[10] गात्राण्यङ्गानि[11] तत्र स तथा, स एवंविधः कायो यस्य स तथा, अनेनाभ्यासजनितं सामर्थ्यमुक्तम्। लङ्घणपवणजइणवायामसमत्थे त्ति लङ्घनं चातिक्रमणं प्लवनं चोत्प्लवनं जविनव्यायामश्च तदन्यः शीघ्रव्यापारस्तेषु समर्थो यः स तथा। उरस्सबलसमागए त्ति अन्तरोत्साहवीर्ययुक्त[12] इत्यर्थः। छेए[13] त्ति प्रयोगज्ञः[14]। दक्खे

---

[1] ऊरू। [2] a f यमलयोः। [3] a f परिघ अर्गला०। [4] a f om. [5] e ०पालीवत्स्कन्धो। [6] a f चम्मेट्टदुह०; a e ०निचित्तगाय०। [7] e इष्टिका। [8] ०कुतुप०। [9] e द्रुघनको। [10] a f have only च for निचितानि। [11] a f गात्राणांगानि, e गात्रान्यङ्गानि। [12] a अन्तरोत्साहचार्य्ययुक्त। [13] a f छर, e छेइ। [14] a f प्रयोगज्ञा।

त्ति शीघ्रकारी[१]। पत्तट्ठे[२] त्ति अधिकृतकर्मणि निष्ठाङ्गतः प्राप्तार्थः, प्रज्ञ इत्यन्ये। कुसले त्ति आलोचितकारी। मेहावि[३] त्ति सकृद्दृष्ट-श्रुतकर्मज्ञः[४]। निउणे त्ति उपायारम्भकः। निउणसिप्पोवगए त्ति सूक्ष्मशिल्पसमन्वित इति॥ अजं वा छगलं,[५] एलकं वा उरभ्रं, शूकरं[६] वा वराहं,[७] कुक्कुटतित्तिरवर्तकलावकपोतकपिञ्जलवायस-श्येनकाः[८] पक्षिविशेषा लोकप्रसिद्धाः॥ हत्थंसि व [illegible] यद्यप्यजा-दीनां हस्तो न विद्यते, तथाप्यग्रेतनपादो[९] हस्त इव, हस्त[१०] इति कृत्वा हस्ते[११] वेत्युक्तम्। यथासम्भवं चैषां हस्तपादखुरपिच्छशृङ्ग-विषाणरोमाणि योजनीयानि। पिच्छं पक्षावयवविशेषः। [illegible]-मिहाजैडकयोः प्रतिपत्तव्यम्। विषाणशब्दो यद्यपि गजदन्ते रूढ-स्तथापीह शूकरदन्ते[१२] प्रतिपत्तव्यः साधर्म्यविशेषादिति॥ [illegible]-मचलं सामान्यतो, निष्पन्दं किञ्चिच्चलनेनापि रहितम्॥

॥ २२२ ॥ आघवणाहि य त्ति आख्यानैः[१३]। [illegible]-भेदतो[१४] वस्तुप्ररूपणाभिः। सञ्ज्ञापनाभिः सञ्ज्ञानजननैः। [illegible]-पनाभिरनुकूलभणितैः॥

इति सप्तमाध्ययनविवरणं[१५] समाप्तम्[१६]॥

---

१ a शीघ्रकारा, f शीघ्रकारो। २ a f पत्तट्ठि। ३ Skr. मेधाविन्। ४ a e om. श्रुत। ५ e छागलं। ६ a f सूकरं। ७ e वाराहं। ८ a f ०कविंजल० ; a f ०सेल्हकाः, e ०सेवहकाः। ९ e ०पादौ। १० e हस्ते। ११ c हस्त इव [illegible]। १२ a f सूकर०। १३ e आख्यातैः। १४ e प्रज्ञापनादिभिर्। १५ a f सप्तमे-ध्ययन०, e सप्तममध्ययन०। १६ a f om.

## अष्टममध्ययनम् ॥

अष्टममपि सुगमं, तथापि किमपि तत्र लिख्यते ॥

॥ २३२ ॥ सकंसाओ त्ति सह कांस्येन द्रव्यमानविशेषेण यास्ताः सकांस्याः[१] ॥

॥ २३३ ॥ कोलघरियाओ त्ति कुलगृहात्पितृगृहादागताः कौलगृहिकाः[२] ॥

॥ २३८ ॥ अन्तराणि य त्ति अवसरान्[३] । छिद्राणि विरलपरिवारत्वानि । विरहान् एकान्तानिति ॥

॥ २४० ॥ मंसलोलेत्यादि मांसलोला मांसलम्पटा । एतदेव विशिष्यते । मांसमूर्छिता तद्दोषानभिज्ञत्वेन मूढेत्यर्थः । मांसग्रथिता मांसानुरागतन्तुभिः सन्दर्भिता । मांसगृद्धा तद्भोगेऽप्यजाताकाङ्क्षाविच्छेदा । मांसाध्युपपन्ना मांसैकाग्रचित्ता ॥ ततश्च बहुविधैर्मांसैश्च[३] सामान्यैस्तद्विशेषैश्च । तथा चाह[४] । सोल्लिएहि य त्ति शूल्यकैश्च[६] शूलसंस्कृतकैः, तलितैश्च[७] घृतादिनाग्नौ संस्कृतैः, भर्जितैश्चाग्निमात्रपक्वैः । सहेति गम्यते ॥ सुरां च काष्ठपिष्टनिष्पन्नाम् । मधु च चौद्रम् । मेरकं च मद्यविशेषम् । मद्यं च गुडधातकीभवम्[८] । सीधु[९] च तद्विशेषम्[१०] । प्रसन्नां[११] च सुराविशेषम् ॥ आसादयन्ती ईषत्स्वादयन्ती । कदाचिद्विस्वादयन्ती[१२] विविध-

---

१ संकांस्याः । २ a f ०गृहिक्याः । ३ f pref. अवसराणि य त्ति । ४ e ०मां om. च । ५ f वाह । ६ a f सूल्यकैश्च । ७ e सूलितैश्च । ८ e ०प्रभवं । ९ ०सीधुश्च । १० e adds च । ११ a प्रथमन्नां, f प्रघमन्नां । १२ a e f कदाचिन्नस्वादयन्ती, but the following explanation of the term, as well as the form of the standing phrase (see footnote † on p. १४६) show that the correct reading must be विस्वादयन्ती ।

प्रकारैर्विशेषेण वा खादयन्तीति। कदाचिदेव परिभाजयन्तौ स्वपरिवारस्य। परिभुञ्जाना सामस्त्येन विवक्षिततद्विशेषान् ॥

॥ २४१ ॥ अमाघातो रूढिशब्दत्वात्[1], अमारिरित्यर्थः ॥

॥ २४२ ॥ कोलघरिए त्ति कुलगृहसम्बन्धिनः ॥

॥ २४६ ॥ गोणपोतकौ गोपुत्रकौ ॥ उद्दवे[illegible] विनाश-यत ॥ मत्त त्ति सुरादिमदवती ॥ लुलिता मदवशेन घूर्णिता स्खलत्पदेत्यर्थः ॥ विकीर्णाः विक्षिप्ताः केशा यस्याः सा तथा ॥ उत्तरीयकं उपरितनवसनं विकर्षयन्ती ॥ मो[illegible][2] कामोद्दीपकान्[3]। शृङ्गारिकान् शृङ्गाररसवतः। स्त्रीभावान् कटाक्षसन्दर्शनादीन्, उपसन्दर्शयन्ती ॥ हं भो त्ति आमन्त्रणम् ॥ महासयया इत्यादेर्विहरसीति पर्यवसानस्य रेवतीवाक्यस्यायमभि-प्रायो, ऽयमेवास्य स्वर्गो मोक्षो वा यन्मया सह विषयसुखानुभवनं,[5] धर्मानुष्ठानं हि विधीयते स्वर्गाद्यर्थं, स्वर्गादिश्चेष्यते सुखार्थं, सुखं चैतावदेव तावद्दृष्टं यत्क। सेवनमिति। भणन्ति च।

जइ नत्थि तत्थ सीमंतिणीउ[6] मणहरपियङ्गुवण्णाओ।
सिद्धं[7] तियबन्धणं खु मोक्खो, न[8] सो मोक्खो ॥

तथा।

सत्यं वच्मि हितं वच्मि सारं वच्मि पुनः पुनः।
अस्मिन्नसारे संसारे सारं सारङ्गलोचना ॥

---

१ e रूढ०। २ a f मोहोन्मद०। ३ f कामोद्दीपिकान्; a e add वदनान्। ४ e स्त्रीस्वभवान। ५ e adds धर्मानुभवनं। ६ a f सिमंतिणाओ, *c. n.* ७ a f pref. ता। ८ e om. न सो मोक्खो; the second line does not scan [illegible] is short by four mātrās.

तथा।

द्विरष्टवर्षा योषित्पञ्चविंशत्यादिकः[१] पुमान्।
अनयोर्निरन्तरा[२] प्रीतिः स्वर्ग इत्यभिधीयते॥

॥२५५॥ अलसएणं ति विषूचिका[३] विशेषलक्षणेन। तल्लक्षणं चेदम्।

नोर्ध्वं व्रजति नाधस्तादाहारो न च पच्यते।
आमाशये[४] ऽलसीभूतस्तेन सो ऽलसकः स्मृतः॥

इति॥

॥२५६॥ हीणे[५] त्ति प्रीत्या हीनः त्यक्तः॥ अवज्झाय त्ति अपध्याता[६] दुर्ध्यानविषयीकृता॥ कुमारेणं[७] ति दुःखमृत्युना॥

॥२५९॥ नो खलु कप्पइ गोयमेत्यादि। सन्तेहिं ति सद्भिर्विद्यमानार्थैः। तच्चेहिं ति तथ्यैस्तत्त्वरूपैर्वानुपचारिकैः[८]। तहिएहिं ति तमेवोक्तं[९] प्रकारमापन्नैर्न मात्रयापि न्यूनाधिकैः किमुक्तं भवति। सब्भूतेरिति। अनिष्टैरवाञ्छितैः। अकान्तैः स्वरूपेणाकमनीयैः। अप्रियैर प्रीतिकारकैः। अमनोज्ञैर्मनसा न ज्ञायन्ते नाभिलष्यन्ते[१०] वक्तुमपि यानि तैः। अमनआपैर्न मनसा आप्यन्ते प्राप्यन्ते चिन्तयापि यानि तैः, वचने चिन्तने[११] च येषां मनो नोत्सहत[१२] इत्यर्थः॥ व्याकरणैर्वचनविशेषैः॥

इति अष्टममध्ययनमुपासकदशानां विवरणतः[१३] समाप्तम्॥

---

१ f ०विंशतिकः। २ अनयोर् does not scan; तयोर् might do. ३ a e e विसूचिका। ४ a f चनाशये। ५ a e f हीण। ६ a f अपध्यातो। ७ e कुमरेणं। ८ f अनुपचरिकैः। ९ e उक्तप्रकारं। १० e places नाभिलष्यन्ते न ज्ञायन्ते। ११ f only वचनेऽपि, om. चिन्तने। १२ e f त्सहत, om. नो। १३ e विवरणसमाप्तम्।

## नवमदशमे अध्ययने ॥

नवमदशमे च कण्ठ्ये[1] एवेति। प्रत्यध्ययनमपक्षेपनिक्षेपावभ्यूह्य वाच्यौ। तथा। "एवं खलु जम्बू" इत्यादि उपासकदशानिगमनवाक्यमध्येयमिति तथा॥

पुस्तकान्तरे सङ्ग्रहगाथा[2] उपलभ्यन्ते। तास्त्विमाः।

वाणियगामे चम्पा दुवे य वाणारसीए नयरीए।
आलभिया[3] य पुरवरी कम्पिल्लपुरं च बोधव्वं॥१॥

पोलासं रायगिहं सावत्थीए पुरीए दोन्नि भवे।
एए उवासगाणं नयरा खलु होन्ति[4] बोधव्वा॥२॥

सिवनन्द-भद्द-सामा धन्न[5]-बहुल[6]-पूस[7]-अग्गिमित्ता य।
रेवइ-अस्सिणि तह फग्गुणी[8] य भज्जाण नामाइं॥३॥

ओहिन्नाण[9]-पिसाए माया वाहि-धण-उत्तरिज्जे य।
भज्जा य सुव्वया दुव्वया[10] निरुवसग्गया दोन्नि[11]॥४॥

अरुणे अरुणाभे खलु अरुणप्पह-अरुणकन्त-सिट्ठे य।
अरुणज्झए य छट्ठे भूय-वडिंसे गवे कीले॥५॥

---

१ e कण्ठे। २ These *gāthā* verses are found at the end of MSS. B and F. They do not occur in MSS. D E G; and MS. A, which probably would have had them, is defective at the end. ३ a आलंभिया आलम्भिया), *c.m.* ४ e ऊंति। ५ a e धण। ६ a e बहुला *c.m.* ७ a e पुस्स। ८ e फग्गुणा। ९ a ०न्नाण। १० a adds य, e दुव्वयाइं। ११ a दोसि।

शिष्टादिनामान्यरुणपदपूर्वाणि दृश्यानि अरुणशिष्टमित्यादि ॥ एतानि पूर्वोक्तानुसारेणावसेयाः ॥ यदिह न व्याख्यातं तत्सर्वं ज्ञाताधर्मकथाव्याख्यानमुपयुक्तेन निरूप्यावसेयमिति । सर्वस्यापि स्वकीयं वचनमभिमतं प्रायशः[1] स्याज्जनस्य । यत्तु स्वस्यापि सम्यग्नहि विहितरुचिः स्यात्, कथं तत्परेषाम् ? । चित्तोल्लासात्कुतश्चिदपि निगदितम् । किञ्चिदेवं मयैतद्युक्तं यदत्र[2], तस्य ग्रहममलधियः कुर्वतां प्रीतये मे ॥

॥ समाप्तमुपासकदशाविवरणम्[3] ॥

---

१ e प्रायशः । २ a यत्र तस्य, e यश्चात्र तस्य for यदत्र तस्य, । ३ e adds 'समाप्तं सप्तमाङ्गम् ।

## ADDITIONAL CRITICAL NOTE.

Page २, footnote ५, f ॰मंतोषिवो (as in text), h ॰मंतोषिवा।

Page ४ f. २, f गंधट्टणणं (as in text), h गंधाट्टण्णं ; so also afterwards t h ॰घो।

Page ५, f. ८, f घोयण, h reads only उदनं कूरं for the whole clause। १० f h कलम॰। ११ f h स्रुय। १२ f चनकाकारो, but h चणकाकारा (as in text)। १५ f h read चूचु, and om. the insertion of c e.

Page ६, f. १, f h read पालुंक।

Page ७, f. ४, f reads the verses as in the text, h reads in the second line वते न पचसदमो, and in the third line तो for ततो।

Page ८ f. ८, f h तेनाहूतं। १० f h तत्समय्थेम् (as in text).

Page १०, f. १६, f h ॰सन्तोमिय त्ति।

Page ११, f. १. f ॰श्चान्यस्यत्ता॰ as in a, but h as in text। ५ f h दृत्ता:।
६ f h कामभोगति॰। ८ f h मेथुनासेव (as in text)।

Page १२, f. ४, f h ॰लुब्धं (as in text)। ५ f h घवभि as in a.

Page १५, f. ५, f h उपभोगपरिभोगव्रतं as in a.

Page १७ f. ४, f h तस्यायं which gives a correct reading.

Page १८, f. ६, f तन्ने (as in a)। ८ f h तस्याः (as in text)। ९ f ॰करणानंतरमेव (as in a).

Page १९ f. ४, f h प्रकाराद्य॰।

Page २०, f. ६, f h गटद्दोर्घ्यंति (as in c e)।

Page २३, f. १, f h भगवयाप्पणोयं (as in a)।

Page २४, f. १, f h (like a) मानुष्यकाः कामभोगा दिव्या वा सम्पद्यन्ते (thus to be separated)। २ h reads विकल्पकृपं। ६ h नमःस्थितुं।

Page ३१, f. ८, h मुंगुंसं पुंकं।

Page ३२, f. ७, h has ॰कुव्व॰।

Page ३३, f, ५, h has ॰कुद्दाल॰।

Page ३४, f. १६, h has दवरकमयम्।

Page ३५, f. २, h reads तद्दाद्दोर्तया which gives correctly the reading of a f । ८ h has गच्छं (like e) । १४ h ०जन्नुए ।

Page ३६, f. ११, h reads खक् मुण्डे (as in text) वा वच्चसि वा । ११ h has मुंभलउ त्ति ।

Page ३७, f. ४, h मिमिमिमोमाणे ।

Page ४१, f. ५, h ०भज्जं । ७ h has the clause within brackets, but omits the preceding clause कल्लाणगपवरवत्थपरिहियं ।

Page ४२, f. २, h gives the passage.

Page ४५, f. २, h ०भावात्तन्न कृत० (as in text) । ७ h पंजलिगडे । १२ h महातिमहत्या, which appears to be the correct reading (महा + अति महः०) ।

Page ४६, f. ३, h omits the same portion, but from यमाहप्पकं रज्जुत्ते. The whole of the Prākrit text is equally incorrect as in a e f.

Page ५५, f. ३, h आहृत्याभ्य० । ९ h अपास्तं (as in e) । १० h gives the last clause thus: साधूपदेशेन रटहिणोऽपि प्रायश्चित्तस्य जातव्यवहारनुयातित्वात् ।

Page ६०, f. ९, h omits as in a f । १० h reads ०प्रत्युत्पन्नानागत० (as in the text).

Page ६२ f. ४, h विकरेद्दा ।

Page ६९, f. १२, h कदाचित्स्वादयन्ती (as in a e f).

Page ७०, f. ६, h सीमंतिणीउ (as in text) । ७ h pref. ता ।

Page ७१, f. १, h ०विंशतिकः । ४ h अनाशये ।

Page ७२, verse 1, h has वरपुरी for पुरवरी । ६ h बहुला । ७ h पुस्स । १० h adds य ।

Page ७३, f. २, यहाव (?), and in the preceding line चित्तोल्लासत्कुतश्चिमदपि ।

---

# शुद्धिपत्रम् ।

| अशुद्धम् । | शुद्धम् । | पृष्ठे । | श्लो । |
|---|---|---|---|
| अल्लल्दुौ० ... | अल्लल्द्दौ० ... ... | ४ ... .. | ४ |
| ०वाद्दोदिति ... | ०वादादिति ... ... | ६ ... .. | १८ |
| ०प्रयोगः ... | ०प्रयोगः ... ... | २२ ... .. | १४ |
| मुगंमा ... | मुगंमा ... ... | ३१ ... .. | ९ |
| उद्योतय० ... | उद्गीतय० ... ... | ४२ ... .. | ८ |
| ऋधि० ... | ऋद्धि० ... ... | ५८ ... .. | ११ |
| अक्रोशयामि ... | आक्रोशयामि ... ... | ६२ ... .. | १५ |

BL 1311 U37 1890 v.1

Uvasagadasao
Upasakadasa-sutram

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY